खग वा. प्रत्यताङ्नः * * । . . . यछ * *;
ज. . . . विशाम्पते;

४ कग का. प्रा * यश्छ. . . गष्म पूषा * सूनृताः;
क वा. . . . यछ . . .; ग उ. . . सुनृताः;

शौ.३.२०.७　अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय।
वातं विष्णुं सरस्वतीं सवितारं च वाजिनम्।।५।।

शौ.३.२०.४.　सोमं राजानमवसे ऽग्निं गीर्भिर्हवामहे।
आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम्।।६।।

शौ.३.२०.६　इन्द्रवायू* बृहस्पतिः सुहवेह हवामहे।
तै.स.४.५.१.५द्रः　यथा नः सर्वमिज्जगत् सङ्गत्यां सुमना असत्।।७।।

शौ.३.२०.५　त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय।
त्वं नो देव दातवे रयिं दानाय चोदय।।८।।

शौ.३.२०.८　वाजस्येदं प्रसवे सं बभूव
मेमा च विश्वा भुवनान्यन्तः।
उतादित्सन्तं दापयति प्रजानन्
रयिं च नः सर्ववीरं नि यच्छात्।।९।।

शौ.३.२०.९　दुह्रां मे पञ्च प्रदिशो दुह्रामुर्वीर्यथाबलम्।
प्रापेयं सर्वामाकूतिं मनसा हृदयेन च।।१०।।

---

५　ख　का. सा. अ.।

६　कख　वा. . . . अग्निं . . .। म. * राजानं मवसेग्निं . . .।

७　क　का. नास्ति। उ. इन्द्रवायु *;
ख　उ. सुहवे * । ग का. * * सर्वमिज्ञनस्;
म. * * सर्वामिजगत्; घ का. सा. अ.।

८　कख　का. सा. अ.।
उ. त्वन्नो . .. यज्ञञ्च (वा, ज.) * ।
ग　का. * * देवतातये; म, वा. त्वन्नो . . .;
म. . . . जातवे ; ज. * * दा → जातवे;

९　का. . . . सम्बभूव य इमा च * . . . उतादिश्छन्तं दामयतु प्रजानां
* धेहि * * यच्छतम्।
ग　म. उतादिछन्तं * *; घ उ. . . . यछात्।।

१०　कख　का. सां. अ.।
वा. दुःह्राम्मे . . .।
गघ　का. . . . कूतिर्मनसा * * ।

शौ.३.२०.१० गोसनिं वाचमुदेयं वर्चसा माभ्यूर्णुहि।
आ रुन्धां सर्वतो वायुस्त्वष्टा पोषाय ध्रियताम्।।११।।

३.३५

शौ.१६.१५.१-६ यत इन्द्र भयामहे ततो नो अभयं कृधि।
मघवञ्छग्धि तव त्वं न ऊतिभि-
र्वि द्विषो वि मृधो जहि।।१।।

इन्द्रं वयमनूराधं+ हवामहे
ऽनु राध्यास्म द्विपदा चतुष्पदा।
मा नः सेना+ अररुषीरुप गु-
र्विषूचीरिन्द्र द्रुहो वि नाशय।।२।।

ऋ.८.६१.१५ इन्द्रस्त्रातोत वृत्रहा परस्पा+ नो वरेण्यः।
स रक्षिता चरमतः स मध्यतः
स पश्चात् स पुरस्तान्नो अस्तु।।३।।

---

११ ख-घ का. वर्चस माभ्यरुण्यंहि। आयु * * वा * पूषाय ध्रीयतां z४z
ख वा, म. * माभ्युर्ण्णहि।

३.३५.१ ग का. सा. अ.।.
म, ज. . . . उतिभि- ;
घ वा, म. * द्युषो . . .।।

२ कग का. . . . . मनोराधं * अनू राध्यास्सद्द्विपदाश् * । * न सोनाररुषीरुम → प . .;
क उ. . . . . मनुराधं * ; ख वा. अनु * * * ।
ग उ. * * शेना . . .; घ ज. . . . दृहो * * ।।

३ कगघ का. सा. अ.।
क म. इन्द्रस्तातोत * ;
ख का. परम्पा * वरेण्याः। वा. परस्या * * ।
ज. लेखः दुष्टः। परस्या? यद्वा 'परस्प' इति।
म. परस्या न्यो * ।
घ म. . . . ऽस्तु।।

ऋ.६.४७.८ उरुं नो लोकमनु नेषि विद्वान्
स्वर्यज्ज्योतिरभयं स्वस्ति।
उग्रा त इन्द्र स्थविरस्य बाहू
उप क्षियेम शरणा बृहन्ता।।४।।

अभयं नः करत्यन्तरिक्ष-
मभयं द्यावापृथिवी उभे।
अभयं पश्चादभयं पुरस्ता-
दुत्तरादधरादभयं नो अस्तु।।५।।

अभयं मित्रादभयममित्रा-
दभयं ज्ञातादभयं पुरो यः।
अभयं नक्तमभयं दिवा नः
सर्वा आशा मम मित्रं भवन्तु।।६।।

**इति तृतीयकाण्डे सप्तमोऽनुवाकः**

### ३.३६

जय प्रेहि माप क्रामः शत्रूणां वेद आ खिद।
इन्द्रः सपत्नहा भीमः सञ्जयस्ते समानृधत्।।१।।

---

४ कख का. रुरुं . . . र्वज्योति . . .।
उ. उरुर्नो (वा. उरुन्नो) . . . स्वर्यज्योति . . .।
गघ का. * * इ * बाहुः * क्षेम . . .।
घ उ. प(म.उप) * * वृहन्तां।।
५ उ. अनुस्वारस्य बहुलं परसवर्णः।
घ का. सा. अ.
६ ख,घ का. सा. अ.।
३.३६.१ कख का. मे . . . चत्तृणां वेदा * । * . . . त्रह * . . . . नृधक्।
घ का, म, ज. संजय . . .।।

ऋ.१.१०२.१० त्वं जयासि न परा जयासा
अर्भेष्वाजौ मघवन् महत्सु च।
उग्रं चित्त्वामवसे सं शिशीमहे*
स त्वं न इन्द्र हवनेषु मृड़।।२।।

कखग ऋ.१.१०२.६ गोजिता बाहू असमक्रतु+ युधि
कखग कर्मन्कर्मञ्छतमूती+ खजङ्करा।
अकल्प इन्द्रोऽप्रतिमानमोजः
स त्वं न इन्द्र हवनेषु मृड़।।३।।

वेदाहमैन्द्रं प्रियमस्य शेवधिं
यदस्य नाम गुह्यं समीके।
स इञ्जयाति मघवा ममासत्य-
स्माकं युध्मो विहवे हवं गमत्।।४।।

---

२ क म. तं * * *; का. * जयासि → मि . . .;
ख-घ का. अभ्येश्वासो * * * । * चित्ता . . . सिशीमहे . . .।
ख वा. * मघन् * * ।
ग उ. * चित्वा . . . सिसीमहे; घ म. * त्वन्न . . .।।

३ का. * * समक्रतूयत् कर्मकर्माशतमूचीदंकरा। . . . मोज . . .।
क उ. * * . . . क्रतु *;
क उ. * वाहु (ज. → हू) असमक्रu *
ख वा. कर्मनकर्मनछतमोती . . . रान्। म. . . . ञ्छतमोती *।
ज . . . . . र्मनूछतमोती *।
ग उ. ऽ नास्ति। घ म. . . . त्वन्न . . .।।

४ का. . . मिन्द्र . . . संयज्ञयापि * ममांप्रत्यद्मा → स्माकं
विध्मोविहचे * * z

ऋ.१.१०२.४; शौ.७.५०.४   वयं जयेम त्वायुजा भृतो
अस्माकमंशमुदवा* भरेभरे।
अस्मभ्यमिन्द्र वरिवः सुगं कृधि
प्र शत्रूणां मघवन् वृष्ण्या* रुज।।५।।

ऋ.१.१०२.६   त्वां देवेषु प्रथमं हवामहे
त्वं बभूविथ पृतनासु सासहिः।
सेमं नः कारुमुपमन्युमुद्भिद-
मिन्द्र करासि प्रसवे रथं पुरः।।६।।

## ३.३७

स्मर स्मरोऽसि देवैर्दत्तोऽसि स्मर।
अमुष्य मन आ स्मर यथाहं कामये तथा।।१।।

---

५ कख का. त्वा * त्वया . . . वृतावृधो अस्माकमंशुमुतवा * ।
क म. . . . यु → यूंजा *;
ख वा, म. अस्माकमत्समुद(म.त)वा * ।
ज. ऽस्माकमत्समुत → दवा * ।
ग वा. मस्मभ्य . . . .;
घ उ. . . . वि(वा. → वु?)ष्णिया * ।।
का. * * * वृज;
६ कख का. . . . समारभे * बभूयथ * *
ख वा. प्रुतनासु . . .। म. प्रतनासु . . .। ज. प्रतनाशु . . .।
उ. . . . . षासहिः।.
ग उ. सेमन्नःकारमु . . . .; का. सोमं . . .;
१.३७.१ ख वा. . . . असि * । ज. ऽ → असि * ।
ग का. * मना *; वा. मनु → अमुष्य . . .;

शोचयास्य हृदयं काम गच्छा-+
ञ्ज्वरो दहतु शोचतु त्मना।
सङ्कल्पा अस्य समरन्ताधीभि-
+रियमेवास्य दिगमहन्यन्याः।।२।।

निरानन्दाः प्रमुच्छदो मनोमुहो-
नयुवो नष्टकृत्वा अरण्यवः।
आवेशिनीः प्रद्रुपो रोपयिष्णु-
रेत आस्ताध्यः प्र हिणोमि ब्रह्मणा।।३।।

हृत्कर्तनी ऋतुदा ग्रामान्नाशनीः
स्वप्रच्छिद उघ्ननीघ्ना मनोमुहः।
आवेशिनीः प्रद्रुपो रोपयिष्णु-
रेत आस्ताध्यः प्र हिणोमि ब्रह्मणा।।४।।

---

२ क का. शोशोचयाम्य . . . .;
ख म. * * शोचतु → त * ।
गघ का. * स्त्य स्मरन्ताधीभिर्यमैवास्यदिध्मोहनमन्या;
ग उ. संकल्पा . . .; वा. ऽस्य . . .; घ उ. रिवमे . . .।।
द्र. घ पाठः सन्दिग्धः।

३ का. नरा . . . मसुथ्यतो मनुमहो नैवोनष्ठकर्त अर्णवः . . . रेतास्त्वाभ्य →'द्य * हिणो * ।
कख वा. * प्रमुत्सदो मनोम → मोहः . . . अरंण्यवः।
द्र. प्र इत्यतः प्राक् 'सा' इति योजितम्।
म, ज. * प्रमुछदो * न(म. यु → )यूवो . . .।
ग वा. आवेशि → शनीः * रोपइष्णु-; एवं चतुर्यमन्त्रेऽपि।

४ का. ऋतुकन्तुनी ऋत्विदाग्रामाभ्यासिनी स्वप्रयच्छ्तु दुध्ना मनोमुह। * * रोपोरोपयिष्णुरेरास्त्वाद्य * * * ।
क म. * रुत्तदा *; ख उ. स्वप्रछि(म. छी)द . . .।
ग < उद्घनिघ्नाः?

इन्द्राग्नी मित्रावरुणा ते अद्यो-
भे च द्यावापृथिवी मातरिश्वा।
अश्विना देवः सविता भगश्च
मनस्त उघ्नन्तु न रमासा अत्र।।५।।

त्रयस्त्रिंशत्त्वा उत घ्नन्तु देवा
आध्यश्चित्तमुप ते भरन्ताम्।
भरद्वाजस्य मतयस्त ईशतां
तु ३.३.७कख छिन्नेव नौर्बन्धनात् प्र प्लवस्व।।६।।

एताः पतन्त्याध्यो वार्षिकीरिव विद्युतः।
तासां प्रतिग्रहो भव सायं गोष्ठे गवामिव।।७।।

नि शीर्षतो नि पातित आध्यो वेशयामि ते।
तास्त्वा समुत्तुदन्तीर्बोधयन्तीरुपासताम्।।८।।

एतास्त आध्यः प्र हिणोमि ब्रह्मणा
*तृप्रा अश्रीपुरोगवाः*।
तास्त्वा तृणमिव शोषयानथो त्वा रोदयान् बहु।।९।।

---

५ का. * * येद्योतयत। द्यावा . . . मनस्तूध्नयन्तु * * तृ ;
क वा, ज. * * * द्यो ;
घ < उद्घ्नन्तु?

६ का. . . . शस्त्वा भूघ्नंतु * ग्निश्चिद्यमुप * भरद्वाजश्च मुत य स्त्रिशतां शिछन्नेव नोर्ध्वधना * * z
क उ. . . . . शत्वा * * * ; ग वा. . . .म → मुतयस्त * । ज. . . . मुतयस्त * ।

७ का. * . . . न्त्याभ्यो → द्यो . . . * तिग्रहो . . . गोछो . . .;
ख ज. वार्षिकी → गीरिव * ।

८ का. * शीर्षो निपातिताभ्यो * * । . . समुत्तन्तीर्वो . . . पासभाम्;
खग म. * भेषयामि * । . . . समत्तुदन्ती . .;

९ का. . . . स्त्वाद्य * * * स्त्रिष्मापुरोगवां . . . शोकयामथो * रोदया बहुः z२z
ख वा. तृप्ता अश्री → शृ . . . गवा। म. तृप्ता अशृ . . . गवा। ज. तृप्ता → प्रा असृ . . . गवा।

## ३.३८

शौ.४.१४.१ अजो ह्यग्नेरजनिष्ट शोकात्
सोऽपश्यज्जनितारमग्रे।
तेन देवा देवतामग्र आयन्
तेन रोहानरोहन्नुप मेधीयांसः।।१।।

शौ.४.१४.२ क्रमध्वमग्निभिर्नाकमुख्यां हस्तेषु बिभ्रतः।
दिवस्पृष्ठं स्वर्गत्वा मिश्रा देवेभिराध्वम्ः

शौ.४.१४.५ तै.४.६.५.२ माध्य.१७.६९ अग्ने प्रेहि प्रथमो देवयतां
चक्षुर्देवानामुत मर्त्यानाम्।
इयक्षमाणा भृगुभिः सजोषसः
स्वर्यन्तु यजमानाः स्वस्ति।।३।।

शौ.४.१४.४ स्वर्यन्तो नापेक्षन्त आ द्यां रोहन्तु राधसः।
यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे।।४।।

---

३.३८.१ ख-घ का. सा. अ.।
ख म. ऽ नास्ति।
ग वा, म. **. . ताम(वा → मु)ग्र आयं;
घ उ. . . . रोहंनुप * ।।

२ ख का. मेक्षां * बिभ्रत;
कख वा. . . . र्नाक(→ गमु)ख्यां ** ;
ग का. . . स्पृषं . .; वा, म. . . स्पृष्टं . . .; घ म. मिस्रा . . .।।

३ क का. . . . देवएतां;
ग वा. . . . सयोषसः; घ उ. * यजमाना * ।।

४ ग का. अग्निविश्वतो . . .;
ख,घ का. सा. अ.।
वा, ज. . . . रोहतु * ।
ग वा. * जे . . . ; म. * यो . . .;

शौ.४.१४.६ ओदनमनज्मि शवसा घृतेन
तै.४.७.१३.१ दिव्यं समुद्रं पयसं बृहन्तम्।
मै.२.१२.३ तेन गेष्म सुकृतस्य लोकं
माध्य.१८.५१ सरो रुहाणा अधि नाकमुत्तमम्।।५।।

माध्य.१८.५२ यौ ते पक्षावजरौ पतत्रिणौ
याभ्यां रक्षांस्यपहंस्योदन।
ताभ्यां पत्यास्म सुकृतस्य लोकं
यत्रर्षयः प्रथमजाः पुराणाः।।६।।

यतस्तिष्ठो दिवस्पृष्ठे व्योमन्नध्योदन।
अन्वायन् सत्यधर्माणो ब्राह्मणा राधसा सह।।७।।

शौ.४.१४.३ पृष्ठात् पृथिव्या *अहमन्तरिक्षमारुह-
मन्तरिक्षाद्दिवमारुहम्।
दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम्।।८।।

---

५ कख का. अग्निंयुनज्मि . . . रुहन्तं।
ग म. *ग्मेष्म . . .;
घ का. स **. . .।
वा. **मधि . . .।। म. **अ → मधि . . .।।
ज. **म → अधि . . . .।।
६. कग का. इमौ *पक्षा अजरौ * . . . दनः *पत्यास्मि . . .;
घ वा, ज. यत्रऋषयः . . . .।।
द्र. क माध्य. 'इमौ. . .' इति।
७ का. यदितिष्ठोसिवस्पृष्ठे व्योमंनधो → ध्योदनः अन्वायं . . . धर्मणो व्रह्मणा **।
ग म. अन्वायन *;
८ कख का. **मन्तरिक्षमार्हमन्तरिक्षादिवमार्हं;
उ. **हमन्तरिक्ष(म.क्षा)मा . . . . क्षादिवमारुहन्।
घ वा. स्वर्ष्योति . . .।

शौ.९.५.१६ अजोऽस्यज स्वर्गोसि
त्वया लोकमङ्गिरसः प्र जानन्।
तं लोकमनु प्र ज्ञेष्म।।९।।

शौ.९.५.१७ येना सहस्रं वहसि येन वा सर्ववेदसम्।
तेनेमं यज्ञं नो वह स्वर्देवेषु गन्तवे।।१०।।

शौ.९.५.३७क *अजं च पचत पञ्च चौदनान्।
अजं पञ्चौदनं पक्त्वा देवा लोकान् समानशुः।।११।।

३.३९

या ते प्रजापिहिता पुराभूद्
ध्रुवेणाश्विनापतं भरामि।
अग्निष्टे तामाद् यमः पुनर्दा-
द्वैश्वानरः परमस्माद् व्योम्नः।।१।।

---

९ क वा, ज. ऽ नास्ति। ज. . . . स्यजः . . .;
ख का. तया . . .;

१० क,ग का. सा. अ.
ख का. * या *;

११ क का. अजत * पंच चोदना।
उ. अज . . .। म. . . . चौदनान् → त्।
घ का. देव * *।

३.३९.१ कख का. . . . विह(→ हि)ता पराभू . . . श्वितापं *।
ख वा. धृवेणा . . .।
ग वा. . . . तामायमः → वः . . . ; म. . . . तामाज्यय्यवः . . . .;
ज. . . . तामायवः . . .;
घ का. . . . . स्माभ्योम्नस्;

त्वं पतिः शिवोऽग्नेर्द्वितीयो-
ऽस्यै* प्रजां जरदष्टिं सृजस्व।
मुञ्चैनां ग्राह्या निर्ऋतिर्यद्बन्धा-
ग्रे प्रजां प्रजाकामायै धेहि।।२।।

त्वामग्ने बृषभं वाशितेय-
माच्य जानु पुत्रकामा सपर्यति।
तामारोह सुमनस्यमानः
प्रजापतेः प्रजया सं सृजैनाम्।।३।।

तुभ्यं नारी पुत्रकामेयमग्ने
शुद्धं पूतं घृतमा जुहोति।
शौ.५.२५.८क तामधिस्कन्द वीरयस्व रेतोधा
उग्रः प्रजया सं सृजैनाम्।।४।।

शौ.५.२५.१ पर्वताद्दिवो योनेर्गात्रादगात्रात् समाशृतम्।
रेतो देवस्यदेवस्य तूसरौ पर्णमिवा धाम्।।५।।

---

२ का. तं * ग्निद्वितीयं मी * . . . दष्टी सतस्व। मुञ्चैनं ग्राह्यान् . .
यदबन्धाग्ने * . . . माय * ।
ख उ. स्मै . . .।

३ क उ. . . . वासितेय ;
ख का. -मान्यजात् * सुपर्यति।
वा. -माच्ययानु * * ।
घ का. प्रणयरेषिणीनां। वा. * प्रजाया . . .।।

४ क का, वा, ज. * पुत्रकामायमग्ने ;
ख उ. . . . जुहोमि। $म_2$. . . . घृमा . . .।।
गघ का. तामनितामनिष्कन्ध वीलयस्व नेतोधा * * * सृजीनां;

५ का. . . . येनेगा . . . समाश्रुतम् नेतो . . . देवस्मरौ . . .
मियाधां;
ख वा, ज. . . . . समाश्रुतं।

इन्द्रस्य जातस्य प्र पपात नाभि-
स्तामेको देवः प्रति जग्राह कामी।
त्वया वयं ब्राह्मणाः सोमपाः
सूपयाम उत या न सूते।।६।।

३.४०

तेजनात्त्यजनं जातं तेजनं जायते शरात्।
न येषति[+] न शोचति यस्त्वा बिभर्ति तेजन।।१।।

परुलमसि तेजन* परुलन्ते प्रभञ्जनम्।
परुलो अस्तु स कामो येनामून् कामयामहे।।२।।

यावदोषः शरो अस्त्वोजनेभ्यः कृणवद्भयम्।
तावदोषस्त्वन्तेजन त्यजनं भवतादिह।।३।।

---

६ क उ. . . . पयात *;
का. . . . देनष् * जग्राहष् * । * * व्रह्मणास् * सुपयास्सुतयान सूयते z४z
घ म. * * * नु → न * ।।३६।।ऋ६।।
ज. सूपयाम → स . . .।। ऋ६।।३६
३.४०.१ क-ग का. त्यजनान्त्यजनं * त्यजनं * शर। * एषति . . .;
क उ. . . . नान्यज(←त, वा.)नं *;
ग वा, म. * येशति . . .; ज. * येसति . . .;
घ वा. . . . तेजन → नः।।
२ का. पौत्रमसितेजनः पौत्रं * * पौत्रोस्तुसो * येनमून् * z
क उ. . . . तेजनं; घ वा. येनामून * ।।
३ का. यादोषश् * स्त्वोदनेभ्यष्कृणवद्भ्यां। . . . षत्वं तेजनस् *;
द्र. का. घ भवतादिहेति पतितम्।
कख वा, ज. . . . ऽस्त्वोज . . .। उ. . . . कृणुवद्भयं।
ग वा. . . . . षस्त्वं → षत्वं . . .;

त्यजनं म आपो दधन् त्यजनं मरुतो दधन्।
त्यजनं मे विश्वे देवास्त्यजनं पितरो दधन्।।४।।

तु.१६.४८.१० तेनाहमन्येषां स्त्रियो अत्याक्षं विद्विषः पुरा।
पुरा द्विषो अत्याक्षं पुरा मध्यन्दिनादुत।
पुरा *सायत्वादत्याक्षं तेजने हि महद्बलम्।।५।।

शौ.६.४४.१कख अस्थाद्द्यौरस्थात् पृथिव्यस्थाद्विश्वमिदं जगत्।
६.७७.१कख अस्थादवहृदेवात्तिष्ठात् कामो अयं तव।।६।।

इति तृतीयकाण्डेऽष्टमोऽनुवाकः

इत्यथर्ववेदे पैप्पलादसंहितायां षड़्चो नाम तृतीयः काण्डः

---

४ कख का. त्यजनं इति यावन्नास्ति।
क ज. . . . दधं; ख, घ का. . . . दधम्।

५ का. ख-ग अ इत्यवधिको भागः पतितः।
ग का. त्या → द्याक्षं;
ख म, ज. . . . विषः * । वा. . . . वि(+द्वि)षः * ।
घ का. * मध्यदि . . .। उ. * मध्यंदि . . .।
ङव का. * सायित्यादित्याक्षं * य महद्विलं।
उ. साय(वा. → सायं)त्वादित्याक्षं;

६ क का. अस्याद्भ्यांरस्तात् . . .; उ. अस्थाद्यौ . . .;
गघ का. अस्थाद्द्विहृदेवास्तिष्ठात् * * * z५z अ ८ zz zz
गघ वा. . . . हृद्दे (→दे)वा . . . । ।ऋ६। ।अ८। ।विष्णु। ।०। ।
म, ज. . . . . वहुदेवात्ति(→स्ति)ष्ठात् . . .। ।ऋ६। ।अ८। ।
द्र. <. . . वहुदेवास्ति . . .। । Hoffmann, 754.
काण्डिकान्ते का. इत्याथर्वणिकपैप्पलादशाखायां तृतीयष्काण्डस्समाप्ताः zz zz
वा. इति षडर्च्चकाण्डः समाप्तः। । म. षडर्च्चकाण्डः समाप्तः। ज. इति षड्चकाण्डः समाप्तः। ।

# चतुर्थः काण्डः

शौ.४.२; मै.२.१३.२३; काठ.४०.१; ४.१

तै.४.१.८; माध्य.२३.१; ऋ.१०.१२१

शौ.४.२.७ हिरण्यगर्भः समवर्तताग्रे
भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतामुं
तस्मै देवाय हविषा विधेम।।१।।

शौ.४.२.१ क-ख य ओजोदा बलदा यश्च विश्व
उपासते प्रशिषं यस्य देवाः।
शौ.४.२.२ ग-घ यस्य च्छायामृतं यस्य मृत्यु-
स्तस्मै देवाय हविषा विधेम।।२।।

शौ.४.२.२क-ख यः प्राणतो निमिषतो विधर्ता
पतिर्विश्वस्य जगतो बभूव।
शौ.४.२.१ ग-घ य ईशेऽस्य द्विपदो यश्चतुष्पद-
स्तस्मै देवाय हविषा विधेम।।३।।

---

४.१ काण्डारम्भे का. ओंनमोनारायणाय zzओं; वा. श्रीगणेशायनमः।। ओं; म, ज. ओं;

१ ख-घ का. * जाताष् .... तेमां कस्मै ...।

ख उ. * सतः (→ शतः, म.) ....।

२ कख का. *** यस्य ** प्रसिशं **; म. * ओयोदा ...। ग वा, म. * छाया ...;

घ का. -ष्कस्मै ***। द्र. का. घ एवमुत्तरत्रापि 'कस्मै' इति। म, ज. -स्तस्मै।। एवमापञ्चमम्।

३ का. * प्रणतो * विधर्त ... ईशे यो अस्य द्विपदश्चतुष्पदष्कस्मै देवा z द्र. एवमापञ्चमम्।

ख-घ वा. .... वभुव। ** अस्य ... स्तस्मै।।

शौ.४.२.४ क द्रः येन द्यौरुग्रा पृथिवी च दृढा
येन *स्वः स्तभितं येन नाकः।
यो अन्तरिक्षं विममे वरीय-
स्तस्मै देवाय हविषा विधेम।।४।।

शौ.४.२.३ क द्रः य इमे द्यावापृथिवी तस्तभाना-
धारयदवसा रेजमाने।
शौ.४.२.४ ग-घ द्रः यस्मिन्नधि वितत एति सूर्य-
स्तस्मै देवाय हविषा विधेम।।५।।

शौ.४.२.५ यस्य विश्वे हिमवन्तो महित्वा
समुद्रं यस्य रसया सहाहुः।
दिशो यस्य प्रदिशः पञ्च देवी-
स्तस्मै देवाय हविषा विधेम।।६।।

शौ.४.२.६द्रः आपो ह यस्य विश्वमायु-
र्दधाना गर्भं जनयन्त मातरः।
तत्र देवानामधि देव आस्त
एक स्थूणे विमिते दृढ उग्रे।।७।।

---

४ क-ग का. यन . . . . * दृश * स्व * * नाकं। . . . . विमम *;
ख उ. * स्वस्त्यभितं * *।
ग म. * ऽ न्तरिक्षं * *;

५ क उ. . . . तस्थभाना;
ख-घ का. धारेदवसा *। . . . सूरष्कस्मैदे z
ग म. . . . एभि (← ति म१) *;

६ क का. * विश्वो . . . ; वा. . . . महीत्वा,
ख वा. . . . . स आहुः। ग ज. . . . प्रदिश * *;

७ ख-घ का. . . . . मातरा। . . . आस्थ * स्तूने विमते * *;
ख ज. . . . जनयंत *।
ग म. देवा *। ज. . . . यास्त;
द्र. ग < एकः स्थूणे ? एकस्थूणे इति बेरेट्।

शौ.४.२.८ क-घ आपो गर्भं जनयन्तीर्वत्समग्रे समैरयन्।
तस्योत जायमानस्योल्व आसीद्धिरण्ययः।।८।।

x हिरण्य उल्ब आसीद् योग्रे वत्सो अजायत।
तं योन्योर्विद्रवन्त्योः पर्यपश्यद्दितिर्मही।।९।।

४.२

काठ.३७.९ भूतो भूतेषु पय आ दधाति
शौ.४.८.१-३ स भूतानामधिपतिर्बभूव।
तै.ब्रा.२.७.१५.१ स ते मृत्युश्चरति राजसूयं
स राजा राज्यमनु मन्यतामिदम्।।१।।

तै.ब्रा.२.७.८.१ अभि प्रेहि वीरयस्वोग्रश्चेत्ता सपत्नहा।
आ तिष्ठ मित्रवर्धन तुभ्यं देवा अधि ब्रुवन्।।२।।

ऋ.३.३८.४ आतिष्ठन्तं परि विश्वे अभूषञ्
छ्रियं वसानश्चरति स्वरोचिः।
महत्तद्वृष्णो असुरस्य नामा
विश्वरूपो अमृतानि तस्थौ।।३।।

---

८ ख,घ का. सा. अ.
गघ वा. . . . नस्योउल्व . . .।।

९ क का. * उल्वासीद्; ख म. . . . ऽ जायत।
गघ का. त्वं योत्योर्वृभ्रवन्त्योष् . . . श्यद्रुडुर्महीः z१z
ग वा. * जोन्योर्वि . . .;
गघ म. * यो अन्यो . . . . श्यदिति . . . ।।१।।ऋ १।।
ज. * योऽन्यो . . . श्यदितिमही ।।ऋ९।।१।।

४.२.१ ख-घ का. सा. अ.।

२ कख का. * * वीळ → द्वायस्वो . . .।
वा. * * . . . स्वोऽग्र . . .।
घ उ. पादान्ते एको दण्डः।

३ क का, उ. . . . अभूषं;
खग का, श्छियो . . . त्तद्विष्णोरसु . . .;

शौ.४.८.७ एना व्याघ्रं परिषस्वजानाः
मै.२.१.६ सिंहं हिन्वन्ति महते सौभगाय।
महिषं न *सुभुवस्तस्थिवांसं
+मर्मृज्यन्ते द्वीपिनमप्स्वन्तः।।४।।

शौ.४.८.४ व्याघ्रो अधि वैयाघ्रे वि क्रमस्व दिशो महीः।
विशस्त्वा सर्वा आयन्त्वापो दिव्याः पयस्वतीः।।५।।

शौ.४.८.५ या आपो दिव्याः पयसा मदन्ति
या अन्तरिक्ष उत पार्थिवा याः।
तासां त्वा सर्वासामपामभि षिञ्चामि वर्चसा।।६।।

शौ.४.८.६ अभि त्वा वर्चसा सिचं दिव्येन पयसा सह।
तै.ब्रा.२.७.१५.४ यथासो मित्रवर्धनस्तथा त्वा सविता करत्।।७।।

---

४ कख का. सा. अ.।
क वा. . . . स्वजाना ; ज. * व्याघ्र *,
गघ का. * नस्सुभव . . . परिमृज्यन्ते . . : मप्सुन्तः;
ग वा. महिष → षं * . . .; म१. महिषन् सु . . .;
म२. महिषन् सुरवस्त . . .; ज. महिस् → स न . . .;
उ, का. . . . सुभव . . .;
घ उ. मर्मृ(ज.म → मेमृ)ह्यन्ते . . .।।

५क क उ. * ति * ; का. * * वैय्याग्रे;
वा. . . . वयाघ्रे;
ख ज. * * * मही(→ हि):।
गघ का. दिशा . . . र्वायान्त्यापो * *;

६ कख का. . . . मदन्त्यान्त . . .;
वा. ऽ न्तरिक्ष * * * । म. * न्तरिक्ष * * *।

७ क का. * * * सृजं ; घ का. . . . सविभा * z२z

४.३

काठ.३७.६ यत्ते चन्द्रं कश्यप रोचनावद्
शौ.१३.३.१०क-ग; यत् संहितं पुष्कलं चित्रभानु* ।
तै.ब्रा.२.७.१५.३ यस्मिन् सूर्या आर्पिताः सप्त साकं
तस्मिन् राजानमधि वि श्रयेमम् ।।१।।

तै.ब्रा.२.७.१५.२ येभिः शिल्पैः पप्रथानामदृंहो
येभिर्दिवमभ्यपिंशः प्रविद्वान् ।
येभिर्वाचं पुष्कलैरव्यय-
स्तेन माग्ने वर्चसा सं सृजेह ।।२।।

तै.ब्रा.२.७.१५.२ येभिः सूर्य आतपति प्रकेतुभि-
र्येभिरग्निर्ददृशे चित्रभांनुः ।
येभिरापश्चन्द्रवर्णा अजिन्वन्
तेन माग्ने वर्चसा सं सृजेह ।।३।।

तै.ब्रा.२.७.१५.३ आयं भातु प्रदिशः पञ्च देवी-
रिन्द्र इव ज्येष्ठो भवतु प्रजानाम् ।
अस्मिन् धेहि पुष्कलं चित्रभा-
न्वयं पृणातु रजसोरुपस्थम् ।।४।।

---

४.३.१ कग का. . . .कश्यपो * दित् * * चित्रभानुः । अस्मिन् * र्पितस् * *;
ख उ. * * * चित्रभानुः ।
ग म. * सूर्य * * सा → शाकं;
२ का. * * पप्रयानामदंहद् येभिर्धाम . . यभि . . लेभिरव्ययंस्तेन . .
क वा. * शिल्पै(→ ल्पौ): . . . .;
ख म. . . . . र्दिव्यंमभ्य . . . । वा . . . . मभ्यपिंश * ।
ग $म_2$ . . . . रव्यस्तेन . . . ।।
३ क का. * * स्तपति . . .;
ख ज. - येभिरग्निददृशे * ।
ग उ. . . . . . अजिन्वं; घ ज. पादान्ते एको दण्डः ।
४ का . अयं * * * * इन्द्र . . .;
क उ. * भ्रातुः . . . .; ख वा. - रिन्द्रैव . . . . ।
ग ज. अस्मिन्देहि . . . .; उ. . . . पुष्कळं . . . . ;

तै.ब्रा.२.७.८.२ अनु त्वेन्द्रोवत्वनु बृहस्पति-
रनु त्वा सोमो अन्वग्निरावीत्।
अनु त्वा विश्वे अवन्तु देवाः
सप्त राजानो य उदाभिषिक्ताः।।५।।

तै.ब्रा.२.७.८.२ अनु त्वा मित्रावरुणेहावता-
मनु द्यावापृथिवी ओषधीभिः।
सूर्योहोभिरनु त्वावतु
चन्द्रमा नक्षत्रैरनु त्वेदमावीत्।।६।।

तै.ब्रा.२.७.८.२; द्यौश्च त्वा पृथिवी च प्रचेतसौ
शौ.६.५३.१ शुक्रो बृहन्[+] दक्षिणा त्वा पिपर्तु।
अनु स्वधा चिकितां सोमो अग्निः
पूषा त्वावतु सविता सवेन।।७।।

४.४

शौ.१.७.१-७ स्तुवानमग्न आ नय यातुधानं किमीदिनम्।
त्वं हि देवान्तितो हन्ता दस्योर्बभूविथ।।१।।

---

५ ख का. * * * न्वग्नि . . . .।
द्र. ज. ३.५क '-ति' इत्यत आरभ्य ५.८ 'ब्रह्मणस्प' इत्यवधिको भागो नास्ति। एतदंशसंवलितं पत्रं भ्रष्टम्।
ग उ. * * * वन्तु *; घ वा. * * ज. . . .।।
६ ख का. * * मोषधीभिः;
ग उ. * हविरनु . . . .;
घ का. . . . . . दमावि;
७ कग का. . . . . . प्रचेतसा * बृहद् * * *। * * सिक्ता * ग्निष् ;
क वा. द्यौःश्च . . .;
ख उ. * वृहं . . . .। वा. . . . . मा *।
ग म. * स्वधां . . . .; वा. * स्वधा → धां?
द्र. काश्मीरीयपाठेषु काठकीयप्रभावः स्यात्?
४.४.१ का. . . . . . मछा नय; . . . देवांस्तुतोहंतातस्योतबभूव्यथा।

आज्यस्य परमेष्ठिन्* जातवेदस्तनूवशिन्।
अग्ने तौलस्य प्राशान् यातुधानान् वि लापय।।२।।

वि लपन्तु यातुधाना अत्रिणो ये किमीदिनः।
अथेदमग्ने नो हविरिन्द्रश्च प्रति हर्यतम्।।३।।

अग्निः पुरस्तादा यच्छतु प्रेन्द्रो नुदतु बाहुमान्।
ब्रवीतु सर्वो यातुमानयमस्मीत्येत्य।।४।।

पश्यामि ते वीर्या जातवेदः
प्र णो ब्रूहि यातुधानान्* नृचक्षः।
त्वया सर्वे परितप्ताः पुरस्ता-
दा यन्तु प्रब्रुवाणा उपेदम्।।५।।

आ रभस्व जातवेदो हृदः कामाय रन्धय।
दूतो नो अग्निरुत्तिष्ठ यातुधानानिहा नय।।६।।

---

२ का. * . . . . मेष्ठिं . . . वशिम्। * तूलस्य प्राशानं यातुधानाद् * लापयः;
कख वा. * परमेष्ठि → ष्ठीनं यातवेदस्तनू . . .।
क म. * परमेष्ठिनं ;

३ खग का. सा. अ.।
ग म२. अपेदमग्ने * *;
घ का. . . . . * हर्यताम्। उ. -रिन्द्रस्य * *।।

४ क का. * पुरस्यादा.* ; उ. यछतु ;
घ म. . . . . मस्मी → स्मैत्येत्य।।
खगघ का. सा. अ.।

५ का. * * * जातवेद * * * यातुधाना नृचक्षा। . . . . परस्थादायान्तु . . . .z
ख उ. . . . यातुधाना *।

६ क-ग का. * रम्भ(→ भ)स्व ब्राह्मणाजातवेदो हृदि * रंधय * नु . . .;
ग उ. * * अग्नि उत्तिष्ठ;

त्वमग्ने यातुधानानुपबद्धानिहा नय।
अथैषामिन्द्रो वज्रेणापि शीर्षाणि वृश्चतु।।७।।

शौ १.८.१ इदं हविर्यातुधानान्नदी फेनमिवा⁺ वहात्।
यदीदं स्त्री *पुमानकरिह स स्तुवतां⁺ जनः।।८।।

शौ.१.८.३ यातुधानस्य सोमप जहि प्रजां नयस्व च।
निष्टुवानस्य पातय परमक्ष्युतावरम्।।९।।

शौ.१.८.२ अयं स्तुवान *आगमत्तं स्मोत प्रति हर्यत।
बृहस्पते वशे कृथा अग्नीषोमा वि विध्यतम्।।१०।।

४.५

शौ.४.४.१ यां त्वा गन्धर्वो अखनद् वरुणाय मितभ्रजे।
तां त्वा वयं खनामस्योषधिं शेपहर्षणीम्।।१।।

कौ.४०.१४ वृषणस्ते खनितारो वृषा त्वमस्योषधे।
वृषासि वृष्ण्यावती वृषणे त्वा खनामसि।।२।।

---

७ ख का. सा. अ.।
गघ का. . . . . वज्रेण अप शीर्षा *; घ उ. . . . . वृश्च्यतु।।

८ का. . . . धानां * हेनमिवा वहां नीदं * पुमान्कर्य शम्भुवतां *;
क म$_2$. * हविर्या . . . .;
ख-घ उ. . . . . फेन इवा *। . . . . पुमान्नकरिह * स्त्ववतां *।।

९ ख-घ का. * * नयस्य *। न्यस्तुवानस्य * पदमक्षतावरं।
खग वा. * * जनयस्य *। निष्टृ → ष्ट्वावानस्य *
म. * * जनयस्व *। निष्ट्वा(म$_2$ ष्टा)नस्य *;

१० का. * स्तुवानागमत्वं . . . . * * कृताग्नीषोमाविद्धतम् z४z
कख उ. * * आगमतं . . . .।

४.५.१ का. * * * षनद् * व्रतभजे * * * . . . षधियं शेवहर्षिणी z
वा. यान्त्वा, तान्त्वा, . . . स्योषधिं → धीं;

२ कग का. वृणस्ते खनतारो * त्वापश्योषधे। . . .;
ग उ. , . . . वृष्णियावती;.

शौ.४.४.२ उदुषा उदु सूर्य उच्छुष्मा ओषधीनाम्।
उदेजति प्रजापतिर्वृषा शुष्मेण वाजिना।।३।।

शौ.४.४.३ ऊर्ध्वश्राणमिदं कृधि यथा स्म ते विरोहतो
अभितप्तमिवानति।
ततस्ते शुष्मवत्तरमियं कृणोत्वोषधिः।।४।।

शौ.४.४.५ अपां रस ओषधीनामथो वनस्पतीनाम्।
अथो सोमस्य भ्रातास्याशर्यमसि वृष्ण्यम्।।५।।

शौ.४.४.८ द्रः अश्वस्य ऋश्यस्य बस्तस्य पुरुषस्य च।
य ऋषभस्य वाजस्तमस्मै देह्योषधे।।६।।

शौ.४.४.४द्रः सं वाजा ऋषभाणां सं शुष्मा ओषधीनाम्।
सं पूषामिन्द्र वृष्ण्यमस्मै धेहि तनूबलम्।।७।।

---

३ क का. . . . . उदं *; ख वा. उछुष्मा *।
गघ का. उदेजितु . . . वजिनाम् z
ग उ. उदेयति . . .;
४ कग का. ऊर्ध्वस्राणिमिदं * * स्मि * * . . . नती;
क म. ऊर्द्ध्वःश्राण . . .;
ख वा. * * * विरोहते → तो;
खग म. * * * विरोहतेऽभि . . . .।
ङ का. . . . . कृणोत्वषधीः . . .;
५ का. * रसौषधीनांमयो * अवो * त्रातम्यारिष्यमसि वृष्णेहं।
६ क-ग का. * ऋष्वस्य भस्तस्य * * ये * *;
उ. * श्र्यस्य * * *। . . . स्तमस्मिन्देव्योषधे।।
७ क,ग वा. सम् . . .;
गघ का. * . . . वृष्णिहमस्मै देहि *।

शौ.४.४.६ अद्याग्ने अद्य सवितरद्य देवि सरस्वति[+]
अद्या मे ब्रह्मणस्पते धनुरिवा तानया पसः।।८।।

x ऊर्ध्वास्तिष्ठन्ति गिरय ऊर्ध्वा वाता उदीरते।
ऊर्ध्वोयं मामको मयूख इवाधि भूम्याम्।।९।।

x उत्तिष्ठोग्र वि धूनुष्व वि तेघ्ना यन्तु नाड्यः।
अतन्द्रो अश्वपा इव नावग्लायोऽधि
मुष्कयोः।।१०।।

इति चतुर्थकाण्डे प्रथमोनुवाकः

४.६

शौ.४.५.१-७ हिरण्यश्रृङ्गो वृषभो यः समुद्रादुदाचरत्।
ऋ.७.५५.७ तेना सहस्येना वयं नि जनानृत् स्वापयामसि।।१।।

न भूमिं वातोऽति वाति नाति तपति सूर्यः।
जनांश्च सर्वान् स्वापय शुनश्चेन्द्रसखा चरन्।।२।।

---

८ क,ग का. सा. अ.।
ख का. * * वृहस्पतिः। उ. * देवी सरस्वती।
द्र. ज. ग '-ते' इत्यतः पुस्तिकायां लभ्यते।
९ क वा. उर्द्ध्वास्ति . . . .;
घ का. मयूषीवाहाद *; वा. मयु → युंख . . . .।।
म. मयुख . . .।।
१० क-ग का. उत्तिष्ठोअग्र * धोनुष्व * ते ष्वायंतु नान्याङ्याः अतोद्रोष्वपायव;
घ. वा ऽ नास्ति।
४.६.१ ख का. सा. अ.।
घ वा. * जनाच्छ्वापयामसि।।
म, ज. * जना(म. स्त्वा →)त्स्वाय . . . ।।
का. * जनांत्स्वा . . . .।
२ का. * * * द्वातु ना * * जिनश्च * * सनश्चेन्द्र . . . चरं ।।
क वा, ज. ऽ नास्ति। ग वा. . . . स्वा → श्वापय;
घ म. मु(म₁ → शु)नश्चेन्द्र . . . .।।

ऋ.७.५५.८ वह्येशयाः⁺ प्रोष्ठेशया नारीर्यास्तल्पशीवरीः।
स्त्रियो याः पुण्यगन्धास्ताः सर्वाः स्वापयामसि।।३।।
x एजदेजदजग्रभं चक्षुः प्राणमजग्रभम्।
अङ्गान्यग्रभं सर्वा रात्रीणामतिशर्वरि।।४।।
ऋ.७.५५.६ य आस्ते यश्च चरति यश्च तिष्ठन् विपश्यति।
तेषां सं दध्मो अक्षाणि यथेदं हर्म्यं तथा।।५।।
ऋ.७.५५.५ स्वप्तु⁺ माता स्वप्तु⁺ पिता स्वप्तु⁺ श्वा स्वप्तु⁺ विश्पतिः*।
स्वपन्तु सर्वे ज्ञातयः सर्वं नि ष्वापया जनम्।।६।।
स्वप्न स्वप्नाभिकरणेन सर्वं नि ष्वापया जनम्।
ओत्सूर्यमन्यान् स्वापयाव्युषं
चरतादहमिन्द्र इवारिष्टो अक्षितः।।७।।

---

३ कख का. वैह्येषया पुष्टिशया . . . तल्पशीवरे।
क उ. वज्येशया * ; ख म, ज. . . . ल्पसीवरीः।
घ का. * सर्वास्त्वा → स्स्वापयामसि।
घ वा. - स्ता * *।। उ. . . . सर्वान् * ।।
४ क का. वेजनेजरजग्रभं ; म. एजदेय . . . ;
गघ का. अङ्गाण्यग्रभं . . . मुतशवरि z
म. . . . मतिसवरि।।
५ क-ग। का. * स्ते यश्चरति यस्य तिष्ठं *। * * दध्सोक्षाणि ;
कख वा. याऽस्ते . . . यश्य → यद्य * *।
म. * * यश्चरति . . . तिष्ठन *।
ग म. * स * *; ज. * * * ऽ क्षाणि;
६ का. सप्त * सप्त * सप्ता श्वा सप्तविस्पतिः स्वपन्तुस् . . . श्वाजनं शय्यः;
उ. सर्वत्र स्वपतु इति। ख स्वा, विस्पतिः इति। अत्र दुर्गामोहनपादैः कृतः शोधोऽस्माभिर्नान्यथा कृतः। शब्-विकरणव्यत्ययोऽपि चिन्त्यः। स्वा, विस्पतिः इत्यत्र सकारस्य प्रभावः। स्वा इति शौ अपि।
७ कख का. सा. अ.।
गघ का. . . . न्यात् स्वापयद्विषं . . . अक्षतः z9zz
ग वा. ओत्सूर्यम(→मा)न्यान्(→न) . . .;
घ उ. चरतादिह . . .।। ऋ ७ ।। ६ ।।

४.७

शौ.२.३३.१; ऋ.१०.१६३.१
अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यामास्यादुत।
यक्ष्मं शीर्षण्यं मस्तिष्काल्ललाटाद्वि वृहामसि।।१।।

शौ.२.३३.२; ऋ.१०.१६३.२
ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्।
यक्ष्मं दोषण्यमंसाभ्यामुरस्तो वि वृहामसि।।२।।

शौ.२.३३.३; ऋ.१०.१६३.३ग
क्लोम्नस्ते हृदय्याभ्यो हलीक्ष्णात् पार्श्वाभ्याम्।
यक्ष्मं मतस्नाभ्यां प्लीह्नो +यक्नस्ते वि वृहामसि।।३।।

शौ. २.३३.४कख ऋ.१०.१६३.३कख शौ.२.३३.६गघ
+आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादुत।
यक्ष्मं पाण्योरङ्गुलिभ्यो नखेभ्यो वि वृहामसि।।४।।

शौ.२.३३.६कख शौ.२.३३.४घ
अस्थिभ्यस्ते मांसेभ्यः स्नावभ्यो धमनिभ्यः।
यक्ष्मं पृष्टिभ्यो मज्जभ्यो नाभ्या वि वृहामसि।।५।।

---

४.७.१ कख का. * स्ते . . . भ्यां नास्याडुत; उ. अक्षीभ्यान् . . .।
ग वा. यक्ष्म → क्ष्मी . . .;
गघ उ. . . . . ष्काललाटाद्वि *।। घ का. . . . वयेमसि ।।
२ खग का. सा. अ.।
गघ का. . . . . भ्यांपु → मुरस्तो * वहामसि।
वा. * . . . . मुर → रुस्ते → स्तो * *।।
३ का. . . . . हृदयाभ्यो हलीक्ष्मात् * यक्ष्मसतस्ताभ्यां क्लिहंयो यतनस्ते * वर्हामसि।
ग वा. यक्ष्म . . .; घ उ. यक्लस्ते . . .।।
४ का. आन्त्रेभ्यस्ते *; वा, ज. आन्तेभ्यस्ते *;
म$_1$ आन्ते (→ स्ते) भ्यस्ते *; म$_2$ आसेन्ते . . .;
ख का. सा. अ.।
ग म. * पारण्योर . . .;
५ का. हस्तेभ्य . . . स्नावभ्यो धमनि x: * * म * नाभ्यां * र्वहामसि।
उ. क अस्ते(→ स्थि म.)भ्यस्ते *; ग * पृष्ठिभ्यो *;
घ म. नाभ्यां * *।

शौ.२.३३.५; ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम्।
ऋ.१०.१६३.४ यक्ष्मं भसद्यं श्रोणिभ्यां भंससो वि वृहामसि।।६।।

शौ.२.३३.७क-ग,ङ अङ्गादङ्गाल्लोम्नोलोम्नो बद्धं पर्वणिपर्वणि।
शौ.२०.९६.२३ यक्ष्मं त्वचस्यन्ते वयं विष्वञ्चं वि वृहामसि।।७।।
क-ग,ङ;
ऋ.१०.१६३.६
ग शौ.२.३३.७घद्र: अङ्गादङ्गादहं तव परुषःपरुषस्परि।
कश्यपस्य विवृहेण यक्ष्मन्ते वि वृहामसि।।८।।

४.८

अग्नी रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।१।।

इन्द्रो रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।२।।

---

६ क का. * द्वेष्ठी . . .; उ. उरुभ्यान् * *; म, ज. . . ऽष्ठी . .;
गघ का. सा. अ.।
ग वा. * भसद्दं → दृध्वं → भ्यं *;

७ क वा, ज. . . . . :ङ्गालोम्नोलोम्नो;
गघ का. सा. अ.।

८ का. . . . * पुरुषः z२z द्र. परुषस्परि इत्यतो नास्ति।

४.८.१ का. अग्रे * . . . . ऋषिराऋषयष् * कवितमा . . . . दुरितां
. . प्रत्यङ् . . . नाअघायते अघं * हराम।
कख वा. . . . . स्तिग्मश्रुङ्ग ऋषिरारषेयः . . .।
घ उ. ऽ नास्ति।

२ का, उ. रक्षोहा इत्यत ऊर्ध्वमूह्यम्। एवं द्वादशं मन्त्रं यावत्।

सोमो रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।३।।

वरुणो रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।४।।

वायू रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।५।।

त्वष्टा रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।६।।

धाता रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।७।।

सविता रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।८।।

सूर्यो रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।९।

---

५ का, म. वायु *।। ६ का. त्वाष्टा *।

चन्द्रमा रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।१०।।

बृहस्पती रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।११।।

प्रजापती रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।१२।।

परमेष्ठी रक्षोहा तिग्मस्तिग्मशृङ्ग
ऋषिरार्षेयः कविः कवितमः।
अपाघशंसं नुदतां सहतामरातिं
प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।।१३।।

४.६

शौ.७.१०९.६ संवसव इति वो नामधेय-
७ मुग्रंपश्या राष्ट्रभृतो ह्यक्षाः।
तस्मै त इन्दो हविषा विधेम
वयं स्याम पतयो रयीणाम्।।१।।

---

११ का. वृहती * z

१३ का. * * z . . . ऋषिराऋषयष् * कवितमा। . . . दुरितां .
. [x] प्रति . . . ना अघायते अघं * नुराम z३z
ख वा. ऋषिरारषेयः . . . . ।
घ उ. ऽ नास्ति।
उ. काण्डिकान्ते श्री इति।

४.६.१. क उ. सम् . . .; कख का. सा. अ.
ग उ. * * इन्द्रो * *;

शौ.७.१०६.१ इदमुग्राय बभ्रवे योऽक्षेषु तनूवशी।
*कृतेन +कलिं शिक्षाणि स नो मृडातीदृशे।।२।।

शौ.७.१०६.२ घृतमग्ने अप्सराभ्यो वह त्वं
पांशूनक्षेभ्यः सिकता अपश्च*।
यथाभगं हव्यदातिं जुषाणा
मदन्तु देवा उभयानि हव्या।।३।।

शौ.७.१०६.५ यो नो देवो धनमिदं दिदेश
यो अक्षाणां ग्रहणं शेषणञ्च।
स नोवतु हविरिदं जुषाणो
गन्धर्वैः सधमादं मदेम।।४।।

शौ.७.१०६.३ या अप्सरसः सधमादं मद-
न्त्यन्तरा हविर्धानं सूर्यं च।
ता नो हस्तौ कृतेन सं सृजन्तु
सपत्नं नः कितवं रन्धयन्तु।।५।।

---

२ का. यद . . . बभ्रव * * तनु . . .। घृतेन कल्पं शिक्षाम। *
* मूळत ईदृशे। ख ज. ऽ नास्ति।
ग उ. घृतेन कलि * (वा. सिक्षाणि); "कृतेन कृतनाम्ना जयहेतुना अक्षेण कलिं पराजयहेतुमक्षं शिक्षाणि निगृह्णानि वशं नयानि" इति दुर्गामोहनपादाः।

३ खग का. पांसुंनखेभ्यस् सिक्तापश्च। . . . भागो * जुषणो;
ख उ. पांशुनक्षेभ्यः (वा. भ्य) * पश्च।

४ कख का. . . . . . तिदेश * क्षाणां * शषणंच।
खग ज. * ऽक्षाणां * शेषणंच। * * हविऋदं *;
घ का. * सद(← ध, म.)मादं *।

५ क-ग का * प्सरसःसदमादं पादंन्य . . .। * नौ हस्तं . . .;
क वा. यो → याऽप्सरसः . . .; ग वा * नौ * * * *;

द्र. कोशेषु अनुस्वारनकारयोर्बहुलं विपर्यासः।

शौ.७.१०६.७ यद्देवान्नाथितो हुवे ब्रह्मचर्यं यदूषिम।
अक्षां यद् *बभ्रूनालभे ते नो मृडन्त्वीदृशे।।६।।

पै.१.७२.४ आदिनवं प्रतिदीव्ने कृतेनास्माँ अभि क्षर।
शौ.७.१०६.४ वृक्षमिवाशन्या जहि यो अस्मान् प्रतिदीव्यति।।७।।

## ४.१०

क शौ.१४.१.२०क भगस्त्वेतो नयतु हस्तगृह्य
ख शौ.७.८.१ बृहस्पतिः पुर एता ते अस्तु।
देवस्त्वा सविता सत्यधर्मो-
पसद्यां नमस्यां कृणोतु।।१।।

यामश्विना मधुकशां देवा *अग्रे अजनयन्।
तया त्वा पत्यामोतां कृण्मो मधुमतीं वयम्।।२।।

उत्तरा श्वश्रुवा भव ननान्दुरुपशिक्षया।
यशस्त्वा पत्यां कृण्मो भवा देवृषु प्रिया।।३।।

---

६ कख,घ का. सा. अ.।
ख वा. . . . . यदुषिम।
ग का. अक्षाण्यद्बभ्रूणालभे; उ. * यद्बभृ(वा. दृभृ)णालभे;
७ का, उ. आदिनवमित्येका। . . . द्र. पै. १.७२.४।
४.१०.१ ख-घ का. * र. . . .। . . . धरोपसद्यां नमस्या *;
२ ख-घ का. * ग्रे . . . नयं * * पत्यामवतां कृण्वो मधुमती * z
ख उ. * ग्रेऽजनयन्
३ का. नानांदुदप(→ रुन)शिक्षा। विशत्वा * कृण्व * * प्रियः;
क उ. * श्वश्रवा * ; ख वा, ज. ननांदु . . .

अद्भिरात्मानं तन्वं शुम्भमाना
गृहान् प्रेहि महिषी भवासि।
तत्र त्वादुगार्हिपत्याय देवाः
प्रजावती जरदष्टिर्यथासः।।४।।

उदुत्तरमारोहन्ती व्यस्यन्ती पृतन्यतः।
*अभ्यष्ठाः शत्रोर्मूर्धानं सहपुत्रा विराड् भव।।५।।

आपम.१.६.७ श्वश्रूणां श्वशुराणां गृहाणाञ्च भगस्य च।
वि राज पत्यां देवृषु सजातानां विराड् भव।।६।।

शौ.६.१.१८ कख यद्गिरिषु पर्वतेषु गोष्वश्वेषु यन्मधु।
ग शौ.१४.१.३६ग येनाक्षा अभ्यषिच्यन्त तेनाहमस्या मूर्धान-
छा.ब्रा.१.७.५ग द्रः मभि षिञ्चामि नार्याः।।७।।
यद्वर्चो गवि कल्याणे यद्वा सूयवसे तृणे।
अभ्यञ्जनस्य यद्वर्चस्तेन मानज्मि वर्चसा।।८।।

**इति चतुर्थकाण्डे द्वितीयोऽनुवाकः**

---

४ का.....रातुमानं...भवामि। * त्वाहुर्गृहपत्याय * प्रजापतिर्ज .....सत्;
घ वा, ज प्रजापती....।।
५ का. यदु....न्तीर्व्यस्यान्तीष्पृद...। अद्भिष्ट्वा...मूर्ध्वानं ...भवः।।
ग उ. अभ्यष्ठाः...; ज. अभ्यछाः? शक्रो → त्रो....,
उ.....मूर्धानं;
६ खग का. गृणांच धनस्य *।...देवेषु;
कख वा. * श्वसुराणां गृहाणांच * *।
७ क-ग का....गिरीषु...यर्मधु।...ख्याभ्यषिच्यन्त;
ङ का. अभि * नार्यः।
ख म, ज.....जन्मधु।
ग उ. अभ्यषिञ्चन्तु....;
८ ख का....सूर्य...*
ज..गवी → वि *...वशे → से *।..स्तेने..
।।ऋ८।।१०।।अर।।

४.११

येनाचरदुशना काव्योग्रे
विद्वान् क्रतूनामुत देवतानाम्।
सहृदयेन हविषा जुहोमि
सध्रीचीनं वो मनोऽस्तूग्रम्।।१।।

महत् सत्यं महद्धविरुशना काव्यो महान्।
देवानामुग्राणां सतां हृदयानि सहाकरम्।।२।।

अहं सत्येन सयुजा चरा-
म्यहं देवीमनुमतिं प्र वेद।
इन्द्रो देवानां हृदंयं वो अस्तु
सध्रीचीनं वो मनोऽस्तूग्रम्।।३।।

त्वष्टा वायुः कश्यप इन्द्रमग्नि-
र्मनसान्वायन् हविषस्पदेन।
अविन्दञ्छक्रं रजसि प्रविष्टं
सध्रीचीनं वो मनोऽस्तूग्रम्।।४।।

---

४.११.१ ग का. सहृदृदयेन * *;
घ म, का. ऽ नास्ति।
वा, ज. सध्रीचीनम्वो . . .।।
द्र. उ. ३ग, ४ग, ५ख, ६ग अनुस्वारस्य बहुलं परसवर्णस्तद्विपर्ययो वा।
२ का. . . . . . रुशनाष् * *। . . . शतं * सहाचर।
ग $म_2$ . . . . सता;
३ ग का. इन्द्रेदंवानां * * स्तु;
घ उ. सध्रीचीनं।। एवं ४र्थेपि मन्त्रे।
४ खग का. . . . . . त्वायं . . .। अविन्दां शकृन्रो * *;
उ. . . . हविषस्य( षःस वा.)देम। अ(म. भि →)विन्दं * *
*।।

येनेमे द्यावापृथिवी विचष्कभु-
र्येनाभवदन्तरिक्षं स्वर्यत्।
मनसा विद्वान् हविषा जुहोमि
सध्रीचीनं वो मनोऽस्तूग्रम्।।५।।

द्यावापृथिवी हृदयं ससूवतु-
र्येनेदं त्वष्टा विकृणोति धीरः।
तस्योशना क्रतुभिः संविदान-
श्चित्तं विवेद मनसि प्रविष्टम्।।६।।

चित्तं चैतदाकूतिश्च येन देवा विषेहिरे।
एतत् सत्यस्य श्रद्धय ऋषयः सप्त जुह्वति।।७।।

४.१२

ऋ.१०.८४.१-७ त्वया मन्यो सरथमारुजन्तो
शौ.४.३१.१-७ हर्षमाणासो हृषिता मरुत्वन्*।
तीक्ष्णेषव आयुधा संशिशाना+
उप प्र यन्तु नरो अग्निरूपाः।।१।।

---

५ कख का. येनमे . . . . थिव्यतष्कर्तुर्येनाभवन्तरिक्षं *।
द्र. क < विचष्कभतुः? पाठः सन्दिग्धः। चस्कम्भतुः इति दुर्गामोहनपादकृतः शोधः।
घ ज, वा, का. ऽ नास्ति।
६ का. ** ससूवध्री(→ श्री)येनेदं * व्यकृणोतु * तस्याउशनष् *. .।
ख म. . . . . विकृणोति → तु *। वा, ज. . . . विकृणोतु *।
गघ उ. . . . . सम्विदान चित्तं * * *।
७ क का. चित्यं . . . कूतितिश्च; म. * चै(ज.त→)ददा . . .;
ख उ. * * विसेहिरे।
गघ म. * * श्रद्धयर्षयः * *।।११।।ऋ७।।
ग ज. * * श्रद्ध(→शर्द्ध)य;
४.१२.१ का. * * . . . जन्त ऋषमाणासो ऋषदा मरुत्वं तीक्ष्ण इषव * संशिशानोप * यन्ति * *;
क वा. * * रुज → दन्तो,
ख उ. * * मरुत्वं।
ग म. तीक्ष्णेशव . . .;
गघ उ. . . . . संशि(ज. शा →)षाना उपः . . .।।

अग्निरिव मन्यो तरसा सहस्व
सेनानीर्नः सहुरे हूत एधि।
जित्वाय शत्रून् वि भजासि वेद
ओजो मिमानो वि मृधो नुदस्व।।२।।

सहस्व मन्यो अभिमातिमस्मे
रुजन् मृणन् प्रमृणन्नेहि शत्रून्।
उग्रं ते *शर्धो नन्वा रुरुध्रे
वशी वशं नयासा एकज त्वम्।।३।।

एको बहूनामसि मन्यवीड़िता
पशून्पशून् युद्धाय सं शिशाधि।
अकृत्तरुक्* त्वया युजा वयं
द्युमन्तं घोषं विजयाय कृण्महे।।४।।

---

२ क-ग का. . . . . त्त्वारसा * स्सेनानीन्रस् * हुत * . . . भजासु *।
ख उ. सेनानीर्ण्णः * (वा. सउरे)भूत *।
ग वा, ज. जित्वाय (→ ठ्) . . .; वा. भिजासि;
म. जित्वा (+य) . . . .;
घ उ. * विमानो . . .।।

३ क,घ का. सा. अ.।
क म. . . . मस्मै;
ख का. * * प्रेहि *। * * श्रद्धो . . . ररुग्ले;
ग उ. उग्रन्ते श्रद्धो (← शरद्धो वा.) * *;

४ क का. . . . . . मन्यमीडताषु; म. * वहुनाम . . . .;
ख वा. पशून . . . .। वा, म. . . . शिसाधि।
ज. . . . . . सिसा(→ शिशा → सा)धि।
ग का. अकृघदुदकया अजा *; उ. अकृत्वरुक् . . .;
घ उ. द्यमन्तं . . . .।।

विजेषकृदिन्द्र इवानवब्रवो-
ऽस्माकं मन्यो अधिपा भवेह।
प्रियं ते नाम सहुरे गृणीमसि
विद्मा तमुत्सं यत आबभूविथ।।५।।

आभूत्या सहसा वज्र सायक
सहो बिभर्ष्यभिभूत उत्तरम्।
क्रत्वा नो मन्यो सह मेद्येधि
महाधनस्य पुरुहूत संसृजि।।६।।

संसृष्टं धनमुभयं समाकृत-
मस्मभ्यं दत्तं वरुणश्च मन्यो।
भियो दधाना हृदयेषु शत्रवः
पराजिता यन्तु परमां परावतम्।।७।।

---

५ क वा. विजेश . . . .; ज. विजेषक्रदिन्द्र . . .;
उ. . . . . इमानवब्र(→ ब्र वा.)वो;
ग उ. प्रियन्ते . . .; वा. . . . सुहुरे *;
खग का. सा. अ.।
घ का. . . . यव आबभूय।

६ क का. . . . . सायकस्; म. आहूत्या . . . .;
ख उ. * . . . र्ष्यविभूत *।
ग वा. . . . . मेव्योधि; म. . . . मेद्योधि;
का. . . . मद्येधि ; उ. कृत्वा . . .;
घ उ. . . . संसृहि।।

७ क का. सा. अ.।
ख $म_1$ . . . . वरुणस्य → श्च *। $म_2$ . . . वरुणस्य → शु *।
वा. . . . . मन्योः।
घ वा. * जन्तु * *।। १२।।ऋ७।।

४.१३

शौ.२.२५.१ शं नो देवी +पृश्निपर्ण्यशं निर्ऋतये करत्।
उग्रा हि कण्वजम्भनी तां त्वाहार्षं सहस्वतीम्+।।१।।

शौ.२.२५.२ सदान्वाघ्नी प्रथमा पृश्निपर्ण्यजायत।
तया कण्वस्याहं शिरश्छिनद्मि शकुनेरिव।।२।।

x ऊर्जभृतं प्राणभृतं प्रजानामुत तर्पणीम्।
सर्वास्ताः पृश्निपर्णीतः कण्वामा अनीनशत्।।३।।

x समाकृत्यैना निरज तीक्ष्णशृङ्ग इव ऋषभः।
अरायं कण्वं पाप्मानं पृश्निपर्णि सहस्वति।।४।।

शौ.२.२५.४,५द्रः त्वमग्रे पृश्निपर्ण्यग्निरिव
प्रदहन्निहि कण्वा जीवितयोपनी।
गिरिमेना आ वेशय
तमांसि यत्र गच्छांस्तत् पापीरपि पादय।।५।।

---

४.१३.१. का. . . . . पृष्ण्यपर्ण्यशं * *। . . . सहस्वती।
उ. शन्नो * पृश्निपर्ण्णीशन्नि . . .। . . . सरस्वतीं।।
ग वा. * * . . . जम्भनि;
द्र. ख व्लिलुग्लक्षणलुङ्ग लेट्।
२ खघ का. पृष्ण्य . . .। * कण्वस्यां . . . शकुनीरिव z
ग वा. * कन्वस्याहं . . .;
३ खघ का. * * . . . मुप *। सर्वास्त्वा पृष्ण्यपर्णी यतष्काण्वा अनीशत्।
ख उ. . . . . . तर्पणि।
द्र. घ.← कण्वामानीनशत्? सप्तमो मन्त्रः द्रष्टव्यः।
४ का. समाकृतीना निरदातस्तीर्णशृङ्गेव ऋषभः रायं ककण्वं * पृष्ण्यपर्णि महस्वती।
ग उ. * कृण्वं *;
५ कख का. . . . पृष्णिप . . . पृन्वहि . . . योपिर्नी।
क वा. . . . . पृश्निपर्ण्ण्यग्नि . . . .,
ख उ. प्रदहंनिहि * (वा क → कृण्वा) *।
गघ का. ग्रामेणावेशय * * वाश्छास्तत् . . . पपातयः;
ग म. गिरि → रमेना * *; घ वा, म. . . . गछांस्तत् . . .।

शौ.२.२५.३ अरायमसृक्पावानं यश्च स्फातिं जिहीर्षति।
गर्भादं कण्वं नाशय पृश्निपर्णि सहस्वति।।६।।

x या नो गा या नो गृहां या नः स्फातिमुपाहरान्।
ता उग्रे पृश्निपर्णि त्वं कण्वामा नीनश इतः।।७।।

४.१४

यस्मिन्नाशीः प्रतिहित इदं त-
च्छल्यो वेणुर्वेष्टनं तेजनं च।
सूनुर्जनित्रीं जनयेहि शृण्व-
न्नयं त आत्वेत इत प्रहितः।।१।।

---

६ कख का. सा. अ.।
वा. . . . जिहिर्षाति।
गघ का. * *. नाशयं पृष्ण्य . . . स्वती। उ. * कृण्वं . . . .।।
७ का. आ. . . . . च . . . हरां। उग्रे पृष्ण्यपर्णि स्तं * * नशैतः z३z
ख वा. * न स्पातिमुपाहरां। म. * न स्फातिरुपाहरां।
ज. * न स्फातिमु (→ रु) पाहरां।
ग उ. * * पृश्निपर्ण्णी (वा. ण्णी) *;
घ वा. . . . . अनीनश इतः → नीनशतः ।।१३।।ऋ७।।
ज. . . . . अनीनश इतः ।। ऋ७।।१३।।
४.१४.१ क का. यस्मिन्नासीस्तिहित * *;
ख वा त्शल्यो ..... नन्तेजनञ्व।
ज. छल्यो . . . नञ्व।
गघ का. मौनिर्जनित्री . . . . शृण्वमयंतातुमयत हितु प्रहित।
गघ वा, ज. सुनुर्जनित्रीं . . . .;
उ. . . . . जन एहि कृण्वं(ज. शृण्वं)नयन्त . . .।।

अस्थि भित्त्वा यदि मज्ज्ञः प्रपाथ
यदि वासि रतः पुरुषन्तिकामे।
उर्वी गव्यूतिमभ्येह्यर्वाङ्
पश्चा रश्मीनुद्यतः+ सूर्यस्य।।२।।

मातरिश्वा पवमानस्त्वायं
सूर्य आभ्राजन् तन्वा दृशेऽकः।
अश्नो गन्धात् पुवसः प्र च्यवस्व
वि मुच्यस्व योन्या या ते अत्र।।३।।

प्र च्यवस्वातो अध्येह्यर्वाङ्
अर्थांस्ते विघ्न बहुधा बर्हिर्ये।
इमाः स्वसारो अयमित् पिता त
इयं ते मातेममेहि बन्धुम्।।४।।

---

२ कख का. अस्ति * यदमज्ञष्पापाथ * वासरितष्.. षंनिकामो।
उ. * भित्वा * मज्ञः * * ...।
ग का. * .... तिसत्येह्यर्वाङ्; उ. गव्युतिम ....;
घ का. * दश्मीनुद्धतस् *।
उ. पश्या रश्मीनुद(म.य)तः सूर्यश्च।।

३ का. .... श्वान् .... मानास्त्वायं सूर्याभ्राजन् ....। ..
. पुंसः * त्यवस्व * * योन्ययास्तेत्र।
खग उ. * आभ्राजं * *। (ऽ नास्ति) अश्लो * * * *।
द्र. ग पीवसः? घ म. * मुच्यस्य ....।।

४ का. * त्यवस्वातौसत्येह्यर्वाङ्र्थांस्ते * * ववीर्ये। ... मत् पिता
चयंते ....*।
क वा. .. र्वाङ; ख वा, म. अर्थांस्ते ...। ज. अर्थान्ते → स्ते .
..।
ग उ. इमा (वा → मां) * ... इयन्ते ....*।।
ग वा. अयमि(→ म)त् * *;

अमित्रैरस्ता यदि वासि मित्रै-
र्देवैर्वा देवि प्रहितावसृष्टा[+]।
विद्वान् शृङ्गं पुरुषे जहाथ
वाणः शृङ्गः शिखरः सं सतामितः।।५।।

सिखासु सक्तो यदि वास्यग्रे
यदि वासि सक्तः पुरुषस्य मांसे।
दधिर्न पाशाँ अपवृह्य मुक्त्वा-
क्षिशल्यः कृणुतामायनाय।।६।।

हस्ताद्धस्तं समयो भ्रियमाणो
बहिष्ट्वा पश्यां वीरुधां बलेन।
अद्भिः प्रणिक्तः शयासा अभ्यक्तः
कोशे जामीनां निहितो अहिंसः।।७।।

षष्टिरात्रे षष्टिकस्य शल्यस्य परिधिष्कृतः।
इतस्तमद्य ते वयमास्थानाद्ध्यावयामसि[+]।।८।।

---

५ का. . . . . रस्त्वा * वासु . . . . देव . . . वशृथ वद्वान् शृ (→ सृ)गं * जहाति z शृङ्गो * * सृजामितः;
क वा. . . . . वा(+सि) *; म, ज. . . . . वासमित्रै ;
ख वा. . . . . प्रहितोवशिष्टाः। म. . . . . प्रहितोवशिष्ट्वा।
ज. . . . . . प्रहिंतोवशिष्ठा।
ग वा. विद्वान . . . .; घ म, ज. * शृङ्गः . . . .।।

६ कख का. सिषासि * * . . . . * वास्यरितः * *;
वा. * स(→ ष)क्तो . . .;
गघ का. दधृणूपाशानुपवृज्यमुक्ता . . . तामायिनाय;
ग वा. दधिर्ण्णः . .; म. दधिर्ण्ण . . .; ज. दधिर्ण्ण → र्न . . .;

७ का. हस्ताभ्यस्तं शमयो भ्रीयमाणो वहिष्ठा * * *। * प्राणक्तस्यास्सत्यक्तः * जमीनां निहतं ह्रंसः;
कख वा. . . . . . भ्रीयमाणोवहिष्टा → ष्ट्वां . . .। ग म. अद्भि . . .; ज. * * * भ्यक्तः;

८ क का. * षष्टिशस्य; वा, म. षष्ठिरात्रे षष्ठिकस्य;
ज. * षष्ठिकस्य;
गघ का. यतस्त्वमद्यदेवयमास्था। नाश्या . . .।
उ. . . . . वयंमास्थानाच्या . . . .।। ऋ८।।१४।।

## ४.१५

शौ.४.१२.३ क-ग सं मज्ञा मज्ज्ञा भवतु समु ते परुषा परुः।
संं ते राष्ट्रस्य विस्रस्तं सं स्नाव समु पर्व ते।।१।।
कशौ.४.१२.४क; मज्ञा मज्ज्ञा सं धीयतामस्थ्नास्थ्यपि* रोहतु।
खशौ.४.१२.३घद्रः स्नाव ते सं दध्मः स्नाव्ना चर्मणा चर्म रोहतु।।२।।
घशौ.४.१२.४ख
शौ.४.१२.५कख लोम लोम्ना सं धीयतां त्वचा सं कल्पया त्वचम्।
शौ.४.१२.४गघ असृक्ते अस्ना रोहतु मांसं मांसेन रोहतु।।३।।

शौ.४.१२.१कख रोहिणी संरोहिण्यस्थ्नः+ शीर्णस्य रोहिणी।
रोहिण्यामह्नि जातासि रोहिण्यस्योषधे।।४।।

शौ.४.१२.२ द्रः यदि शीर्णं यदि द्युत्तमस्ति पेष्ट्रं त आत्मनः।
धाता तत् सर्वं कल्पयात् सं दधत् परुषा परुः।।५।।

---

४.१५.१ क का. * मजा * *; उ. . . . . मज्ञा *;
गघ का. * * मांसस्य * * स्नावमसु * *। ग वा. सन्ते . . .;
द्र. ग शौ. * * मांसस्य *;
२ का. मजज्ञा * * . . मध्नास्थवि *। स्नाव * * दध्म * * * रोहतू
कख उ. * मज्ञा सन्धीयतामथ्नास्थ्यपि *।
३ क उ. * * सन्धी . . . .; वा. लोम → मा . . . .;
ख का. त्वचं सङ्कल्पया *। ज. . . . . सङ्कल्पया *।
ग का. . . . . क्तेस्रा *;
४ का. रोहिणीस् * रोहिण्याथ्नश् * * रोहिणीरोहिण्यामृह आतासि . . . .;
कख उ. * संरोहिण्यःस्नः * *।
ख वा. . . . शीर्णःस्य *। ग ज. . . . ण्याम → वह्नि . . .;
घ वा. रोहिण्यःस्यो . . . .।।
५ का. यदशीर्णेयदद्युत्तमस्थिपेष्टं तातुपुनः। * * * कल्पयाया मंदधत * *।
क उ. . . . द्यत - ; ख म१, ज. . . पेष्ट्रन्त * । म२. . .येष्ट्रन्त *।
घ म१ * न्दधत * *।
म२ ५घ त्परुषा इत्यतः ७ग सुपवि इति यावत् पतितम्।

यदि वज्रो विसृष्टस्त्वार काटात्
पतित्वा यदि वा विरिष्टम्।
वृक्षाद्वा यदवसद्दशशीर्ष
+ऋभू रथस्येव सं दधामि ते परुः।।६।।

शौ.४.१२.६ द्रः उत्तिष्ठ प्रेहि समिधाय ते परुः
सं ते धाता दधातु तन्वो विरिष्टम्।
रथः सुचक्रः सुपविर्यथैति
सुखः सुनाभिः प्रति तिष्ठ एवम्।।७।।

**इति चतुर्थकाण्डे तृतीयोऽनुवाकः**

**४.१६**

पै.२.१४.१कख उद्यंन्नादित्यो घुणान् हन्तु
सूर्यो निम्रोचन्रश्मिभिर्हन्तु।
तावन्नो अधि संहितम्।।१।।

---

६ का. . . . . विसृष्टस्त्वारकाटातु . . . वरिष्टं। . . . यदिवाविभ्यसि शीर्षर्भूरितिस एवं सन्धामि * *;
क म. * * विसृष्टः त्वार *; द्र. पादविभागः सन्दिग्धः।
ग उ. . . . . ज (→ य वा.) दवसद्द . .;
घ उ. रिभू . . . .।। ज. सन्दे . . . . ।
७ कग का. . . . समुधाहि . . . तन्नो विरिष्टां रथस्यचक्रप्युपवर्यथैर्यथैति;
ख उ. सन्ते . . . .। वा. . . . वरिष्टं।
घ का. सुखस्यनाभिष्म . . . z५z अनु ३zz
वा. सुख(+ :)स्य (→सु)नाभिः . . . ।।१५।।ऋ७।।अ३।।
ज. सुख (+:)स्युनाभिः . . . ।।ऋ७।।१५।।अ३।।
४.१६.१ का. . . . गुणान् * * . . . . भिरुवन्तु। . . . संहतं;
वा. . . . . घृणान * ; ज. . . . गुणान *;
ख उ. * . . . . चन्द्र(ज. न्द्रः)श्मिभि . . . .।

अप्सरा मूलमखनद् गन्धर्वः पर्यब्रवीत्।
तेन वो वृत्रहा सूर्यो नि जम्भ्यां अम्रुचद्* घुणान्⁺।।२।।

ऋ.१.१९१.२ द्रः ⁺घुणान् हन्त्वायती घुणान् हन्तु परायती।
घुणानवघ्नती हन्तु घुणान् पिनष्टु पिंषती*।।३।।

घुणा न किञ्चनेह वः प्रतिबुद्धा अभूतन।
ऋ.१.१९१.५ द्रः प्रदोषं तस्करा इव।।४।।
घुणानामद्यतो ज्येष्ठः कनिष्ठ उत मध्यमः।
हता वः सर्वे ज्ञातयो हता माता हतः पिता।।५।।
यथा फेन उदकेन ददृशानो निजस्यति⁺।
एवा वयं घुणान् सर्वान् साकं वाचा
नि जासयामसि।।६।।

ऋ.१.१९१.४कख; शौ.६.५२.२कख नि गोवो गोष्ठे असदन्नि मृगासो अविक्षत।
नित्यमादित्य रश्मिभिर्घुणान् सर्वाँ अजीजसः।।७।।

---

२ का. * . . . . . मघनद् . . वत्रहा * * जस्स्यां निमृत्रतघ्नां।
घ उ. * * अमृतद्घृ(ज. → घु)णाः।।
३ का. गुणान् . . घ्नान् * * घ्राणान् वघ्नती * * पिनष्टि पिशतीं;
कख म, ज. घुणानहंत्वायतीघृणान * *।
ख वा. घुणानहन्तु *।
घ उ. घुणानपिनष्टपिंशति (← तु ज.)।।
४ क का. * नष् . . . .; उ. . . . व ;
क ज. . . . . किं च . . . .; घ वा, ज. प्रदोषन् . . .।।
५ का. गुणानामध्यत * कनिष्ठा * * * वा . . .;
ख वा. कनिष्ठः * *।
६ का. * * उदके * निजस्यतु एवान् . . .।
ख वा, ज. . . . . निजस्पतिः। म. . . . निजस्पति।
घ उ. शा(← सा ज.)कं * * जाशया . . . .।।
७ का. * गांवो * . . . । . . . र्घृणान् सर्वानजी . . .।
कख उ. * * * असदंनि * *।
द्र. ग. < नि त्वम् आदित्य . . . .? ८गघ द्र.

क शौ.१३.२.१०क　उद्यन् रश्मीना तनुष्व वाणवद्भिः समर्पय।
*घुणांस्त्वं सर्वानादित्य घोरया तन्वा तप।।८।।

४.१७

य आनतः पराणतो दारोरिवापतक्षणम्।
शर्कोटो नाम वा असि कुतस्त्वं विषवानसः।।१।।

शौ.७.५६.८　य उभयेन प्रहरसि †पुच्छेन चास्येन च।
आस्ये च न ते विषं कुतस्ते †पुच्छधावसत्।।२।।

विदुतुसुरस्य दानवस्य तस्य त्वं नपादसि।
तस्याग्रेरसं विषं ततस्तुवारसं विषम्।।३।।

शौ.६.१३८.३.द्रः　अरसारसं त्वाकरं वध्रे वध्रिं त्वाकरम्।
वध्रिं त्वा चक्रुर्देवा अमृतास आसुरम्।।४।।

ऋ.१.१९१.१५　इयत्तकः कुसुम्भकस्तकं भिनद्मि शम्यया*।
ततो विषं परासिचमपाचीमनु संवतम्।।५।।

---

८　का. उद्यं रथीना * वाणवभि *।
घृणात्वं पर्वणादित्य * * तपः z9z
ग　उ. घुणास्त्वं . . .;
४.१७.१　का. यानतष्परणतो . . . . वासि . . . . विथवानश।
२ गघ　का. यास्ये . . . पुश्छदा . . . .;
३　का. विदस्पुतश्य * * * नषादसि।
. . . . ततस्त्ववारसं *।
४　का. रसारसं . . . चक्रक्रन्देवा . . . तासासुरं।
५　का. यत्तकष्ककुम्भक . . . तंमया। * विषां परासिच। सपाचीमनु संवितं;
ख　वा. . . . सम्मया। म. . . . शम्म्या। ज. . . . शंमया।
गघ　मर. . . . . चम्यपाची . . .।।

ऋ.१.१९१.१४ इमाः पश्चा मयूर्यः सप्त स्वसारो अग्रुवः।
तास्ते विषं वि जह्रिर उदकं कुम्भिनीरिव
कूपात् कुलजनीरिव।।६।।

ऋ.१.१९१.१३द्रः नवानां नवतीनां विषस्य रोपुषीणाम्।
पै.३.६.७
पै.४.१६.८ सर्वासामग्रभं नाम वीतापेतारसं विषम्।।७।।

४.१८

व्रातमहमपक्ष्णानां व्रातं मुण्डीयसामुत।
व्रातं मुण्डिव्लानामहं प्र ध्वाङ्क्षाँ इव चातये।।१।।

प्रवक्ता प्रमादैता निद्रातन्द्रीस्तृतीयकः।
*तान् जङ्गिडस्याग्निना सर्वान् प्रति दहामसि।।२।।

अशुद्धान्नः परि पाहि रक्षोभ्य उत जङ्गिड।
यातुधानात् किमीदिनस्तस्मान्नः पाहि जङ्गिड।।३।।

अप्सराभ्यो गन्धर्वेभ्यो देवेभ्यो असुरेभ्यः।
अथो सर्वस्मात् पाप्मनस्तस्मान्नः पाहि जङ्गिड।।४।।

---

क का. इमः * *;
ग-ङ का. . . . जहुरुदकं . . . । . . . । ज. . . . जभ्रिर . . .;
उ. . . . . कुम्भनी . . . * कुळ(ळि म.)जिनीरिव।।
७ उ, का. नवानांनवतीनामित्येका।। ३.६.७ द्र.
४.१८.१ का. . . . . हसपक्षिणां। * तुण्डीयशामुत। * वुद्धिर्बलानांमहं *
ध्वांरक्षा * *।
क वा, म. . . . . पक्षणानां; ज. . . . . पक्ष्णाणा (→ ∂)नां
ख वा. * मुण्डिव्रा → व्ला . . . .; घ उ. * ध्वांक्षां * *।।
२ का. * * निभ्रा . . स्तीतीयक। तां जंगित्रस्या . . . सर्व्रं अपयजामसि
→ महि।
वा. * प्रमादइ → दैता; द्र. < प्रमादयिता?
ग उ. तां . . .;
३ का. अशुन्धांनष् . . जंगिनः . . दिनः तस्मा . . जंगिदुः → डः;
४ क का. वत्सराभ्यो *;
गघ का. यातुधानात् किमीदिनः तस्मान्नष्पातुं जंगिदुः;

नि ते शत्रून् दहति देवो अग्नि-
र्निररातिममतिं यातुधानान्।
आ याहि शत्रून् दुरितापघ्नञ्
छतान्नो यक्ष्मेभ्यः परि पाहि जङ्गिड।।५।।

अकर्माग्निमधिपामस्य देव-
मन्वा रप्सि सहसा दैव्येन।
सहस्वान्नः सहसा पातु जङ्गिड़ो
यथा जयेम पृतनाज्येषु।।६।।

सत्यो अग्निः सत्या आपः
सत्येमे द्यावापृथिवी विश्वसंभुवौ।
सत्यमिदं ब्रह्मास्माकं कृतमस्तु
यमबध्नादुशनेन्द्राय तं ते बध्नामि जङ्गिड़म्।।७।।

---

५ का. *** दति * अग्निस्त्रिररातुममितं . . . धानां *** दुरितापघ्नायां सतां नो *। ** जंगिडः नितेशत्रृन्दहतिदेवोग्निर्निर रातुमसितंयातु-धानां आयाहिशत्रू दुरितापघ्नायांसतांनोयक्ष्मेभ्यः। परिपाहि जंगिडः;

कख उ. . . . . अग्निनिर . . .

गघ उ. . . . . दुरितासिपघ्नछतांनो (ज.- तांन्नो, वा. - तानो) . . .।।

म. . . . जक्ष्मेभ्यः . . .।।

६ ख का. . . . . . रप्स्व **।

घ का. यतो . . .;

उ. ** प्रु(म. प्र)तनाह्ये(← ज्ये वा.)षु।।

७ कख का. * ग्निस्सत्यापः . . . विश्वशम्भू;

ङ उ.तन्ते **।।ऋ७।।१८।।

४.१६

ऋ.१.१९१.११.द्रः इयत्तिका शकुन्तिका सका जघास ते विषम्।
माहं मृषि मो असौ पुरुषो मृत।
स च न मरति मा वयं मराम।
आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।।१।।

ऋ.१.१९१.१०. द्रः सूर्ये विषमा सृजामि दृतिं सुरावतो गृहे।
माहं मृषि मो असौ पुरुषो मृत।
स च न मरति मा वयं मराम।
आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।।२।।

ऋ.१.१९१.१२.द्रः त्रिषप्ता विस्फुलिङ्गका विषस्य पुष्पकमक्षन्[1]।
माहं मृषि मो असौ पुरुषो मृत।
स च न मरति मा वयं मराम।
आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।।३।।

आल्वन्तरुटं विषं विदारी करम्भो अरसं विषम्।
माहं मृषि मो असौ पुरुषो मृत।
स च न मरति मा वयं मराम।
आरे अस्य योज़नं हरिष्ठा मधु त्वा मधुला क़रत्।।४।।

---

४.१६.१ का. इयन्तिका * सखा * * *। महं मृष्यसौ * * मृतः * ज * मराति * * मरामारेभ्योजनं हरिष्ठा . . .।
घ म, ज . . . व.→ मराम।

२ का. सूर्यं विषसं * द्वितीयं * *।
का, उ. 'माहं' इत्यत ऊह्यम्। एवं षष्ठं यावत्।

३ का. त्रिषुप्ता विष्पूलिङ्गका * पुष्पकमक्षना।
क वा. * विस्फलिङ्गिका; म,ज. तृषप्ता * ;
ख उ. * पुष्पमक्षकं।

४ का. आल्वन्तरोटं * वितारी * रसं *।
वा, ज. आल्वंतरुटं . . .। उ. . . . * रसं *।

वारुग्रमरसं विषमग्रिश्च विषचर्षणिम्।
माहं मृषि मो असौ पुरुषो मृत।
स च न मरति मा वयं मराम।
आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।।५।।

शकुन्तिका मे अब्रवीद् विषपुष्पं धयन्तिका।
माहं मृषि मो असौ पुरुषो मृत।
स च न मरति मा वयं मराम।
आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।।६।।

न रोपयति न मादयति न विषं हन्ति पूरुषम्⁺।
माहं मृषि मो असौ पुरुंषो मृत।
स च न मरति मा वयं मराम।
ऋ.१.१९१.१३.द्रः आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।।७।।

पै.३.६.७; नवानां नवतीनां विषस्य रोपुषीणाम्।
पै.४.१७.७ सर्वासामग्रभं नाम वीतापेतारसं विषम्।।८।'

---

५ का. . . . . विश्वचर्षणिः; वा. . . . मग्रिंश्च *।
६ का. * * ब्रवीद् * धयन्तिकः;
ज. . . . . दिषपुष्पन्धय . . .।। वा. . . . . ष्पन्धय . . .।
७ का. . . . . पौरुषं। महमृषमौ असौ * मृतः। * जन * मराति * * मदामारेस्योजनं * मरु * * *;
ख वा. नि → न . . .। म. नि . . . .। उ. . . . पुरुषं।
घ म. . . . . व → मराम। ज. . . . वराम।
८ का, उ. नवानांनवतीनामित्येका।। ३.६.७ द्र.

४.२०

मधुमती पत्ये अस्मि जाराय मधुमत्तरा।
अथो *मधव्यं मे भंसो मधु निपदने अहम्।।१।।

मधुना मा सं सृजामि *मासरेण सुरा इव।
वाङ्ग *इयं मधुना संसृष्टाक्षी मे मधुसंदृशी।।२।।

मधु द्यौर्मधु पृथिवी मध्विन्द्रो मधु सूर्यः।
स्त्रियो या जज्ञिरे मधु ताभ्योहं मधुमत्तरा।।३।।

मधुमतीरोषधय आपो मधुमतीरुत।
गावो या जज्ञिरे मधु ताभ्योहं मधुमत्तरा।।४।।

मधोर्जातो मधुघो वीरुधां बलवत्तमः।
तेनाहं सर्वस्मै पुंसे कृण्वे निकरणं हृदि।।५।।

०

---

८.२०.१ का. **स्मियज्ञारायमधुमत्तरः * मधुमव्यसे * मधोन्निपतनेहं;
ग वा. * मधुव्यंम्मे *; म, ज. * मधुव्यं * *;
घ वा, ज. * निपदमे → ने *।।
२ ख का, उ. मासुरेण . . . .। का. सुरामिव।
गघ का. वाङ्मह्यं * . . . मी *; ग उ. वाङ्मयं * . . . .;
३ ग उ. * * यज्ञिरे *;
घ का. . . . . मत्तरः;
४ क का. . . . . रुषधय;
गघ का. * * * धु . . . मत्तरः;
ग वा. * जा . . .; उ. . . . यज्ञिरे *;
५ क का. मधुर्जातोमधुग; म. मधोर्यातो *;
ग का. . . . पुसे; घ वा. * निकर्ण *।।

यथांश्व बन्धनेष्ठो वड़वामभिधावति।
एवा त्वमुग्र ओषधेमुं कनिक्रदतमा नय।।६।।

अङ्गो नु मोदिव श्वसो अङ्गो नु मोदिव स्तनः।
अन्या विवित्स मा नो अन्याः परा जिघांसन्।
ङ शौ. ३.१८.६ग मामनु प्र ते मनश्छाया यन्तुमिवान्वयत्।।७।।

इति चतुर्थकाण्डे चतुर्थोऽनुवाकः

४.२१

खनन्ति त्वा तैमाता दासा अरसबाहवः।
ग शौ.४.७.६ग द्रः दास्यसि प्रक्रीरस्युत्खातमरसं विषम्।।१।।

घ पै.२.१.४घ, ५घ; शौ. ४.७.५घ अदन्ति त्वा कक्कटासः कुरुङ्गा अधि सानुषु।
पापी +जग्धप्रसूरस्यभ्रिखाते न रूरुपः।।२।।

---

६ क उ. यथास्यो * (म. वन्धनेष्ये);
ख वा, म. * अभिदावति। ज. * अभि (→ पि) धावति।
घ का. कनिक्रदतिमा *;

७ कख का. अंगोन * दिवि * अंगोन * दिवि *; द्र. कख अर्थः?
क उ. . . . स्वसो; ग वा. * वि (+व) त्समानो;
म, ज. * विवत्समानो ;
घ उ. . . . जिघांसं।
ङच का. . . . . प्रते . . . वानयत् z५z अनुवा ४zz
च वा. . . . . जन्तु . . .।।२०।।ऋ७।।अ४।।

४.२१.१ का. * * तयिमाता दामारसि . . . . . .। दासस्य प्रक्रीदुस्युतख इमरससं *।
क म. खनंति . . .; ख वा. * अ(→ δ)रस . . .।।

२ का. इदंति * कर्कटाशः * * सानिषु * जग्धि . . . स्यत्रिषाते नर *।
क वा. * * कःक्रटासः;
गघ उ. * . . . प्रसूतरस्य . . . रुरुपः।।

क शौ.६.४२.१क अव ज्यामिव धन्वनः शुष्मं तिरामि ते विष* ।
प्र रोपीरस्य पातय सूर्यः पूर्वा इवोषसः । । ३ । ।

पै.४.२२.३ द्रः सिन्धुः पश्चात् परिहितः सूर्यस्योदयनं पुरः ।
ततो यदन्तरा वनं तत् सर्वं विषदूषणम् । । ४ । ।

मधु त्वा मधुकृत् कृणोतु पितुं त्वा पितुकृत् कृणोतु ।
उतो निषद्य पातवे अथो ऊर्ध्वाय तिष्ठते । । ५ । ।

जघास त्वा लोमकर्णस्तन्यासपरुरुष्णियाम् ।
तद्धैमीश्चक्रिरे स्रजः सर्वं महिषदो विषम् । । ६ । ।

उर्व्या+ उरुक्षितस्तुराया आतुरस्य च ।
भूम्या हि जग्रभं नाम विषं वारयतामिति
विषं दूषयतादिति । । ७ । ।

---

३ का. * ज्ञामिवि धन्विनः * तत्रोमि * विषः । परारोरंस्य * सूर्य *
शवोषसुः → वशोषमः;

ख उ. शुष्मन् (वा. शुष्म) * * विषः ।

४ क का. सिन्दुष् * *; म. * * परहितः;

ख-घ का. . . . पुनः * . . . विषं * * विदूषणं ।

५ ख उ. पितं * पितकृत् * ।

गघ का. ततो * पातये रघोवाय * ।

६ का. * * लोमकण्यस्तन्मामुपरिष्ण्या परुद्दैमश्चक्रिरे सृज * न्वैषजो
* ।

ख वा. . . . परूरुष्णियां । ज. . . . पऋरुष्णियां ।

द्र. कख पदविभागोऽर्थश्च संशयितौ ।

७ कख का. उर्व्यउरक्षतस्तुरायातुरस्य * ।

ग ज. उरुया

४.२२

अहं वा इन्द्रमातरमिन्द्रौजामिन्द्रभ्रातरम्।
इन्द्राधिवक्रां वीरुधमाहार्षं विषदूषणीम्।।१।।

यत् किञ्च पद्वच्छफवद् यत् काण्डि यच्च पुष्पवत्।
ग शौ. ४.४.२ग यदेजति प्रजापतिः सर्वं तद्विषदूषणम्।।२।।

पै. ४.२१.४ द्रः सिन्धुः पश्चाद्वरुणः सूर्यस्योदयनं पुरः।
ततो यदन्तरा विषं तद्वाचा दूषयामसि।।३।।

यावत् सूर्यो वितपति यावद्द्यामभि विपश्यति।
तावद्विषस्य दूषणं वचो निर्मन्त्रयामहे।।४।।

जिह्वा मे मधुसंस्रावा जिह्वा मे मदुवादिनी।
घ शौ.१६.३६.२ जिह्वे वर्चस्वती भव *माप ते पुरुषो रिषत्।।५।।

हा है कल्याणि सुभगे*पृश्निपर्ण्यनातुरे।
इमं मे अद्य *पूरुषं दीर्घायुत्वायोन्नय।।६।।

याभ्यो वर्षन्ति वृष्टयो याभिर्जीवन्त्यघ्न्याः।
ता मे विषस्य दूषणीः सविता व्यकाशयत्।।७।।

---

४.२२.१ ख-घ का. मिन्द्रोमामिन्द्र . . . इन्द्रादि . . . मर्ष . . . दूषणी।
ग वा, ज. . . . वज्रां (वा. → क्रां) . . .;
२ का. यदिकिचि पद्वत् सभवद्यात् काण्डे यश्च * उदेजितु * * . . .;
क ज. * किंच . . .; उ. . . . पद्यछफवद्;
ग वा, ज. . . . प्रजान(→°प ज.)ति; म१ . . प्रजापति;
म२. यदेयति प्रजापति;
द्र. पाठः काश्मीरीयपुस्तकाद् गृहीतत्वान्नामूलः, अपि तु संशयितः।
३ कख का. * पश्चाद्वरुणस् . . . पुनः;
४ कख का. * * धिपतियावश्चाधावपश्यति।
५ घ का. सा(मा?)प * * *। उ. मांवते * *।
पाठः संशयितः। मायं ते . . . इति शोधः?
६ का. * ही * * पृष्णिपर्ण्य . . .। * * * पौरुषं . . . त्वायोअन्वयः
ग उ. . . . पुरुषं; घं म. दीर्घायत्वा . . .।
७ का. याद्यो वर्षन्तु * * जीवंत्यघ्न्या। त. . . . काशयत् Z२Z
ख वा, ज. . . . जीवन्त्यघ्न्यां → ः। म. . . . वंत्यघ्न्यां।

## ४.२३

शौ.१९.४६.१-७ प्रजापतिष्ट्वा बध्नात् प्रथममस्तृतं वीर्याय कम्।
तं ते बध्नाम्यायुषे वर्चस ओजसे च बलाय
चास्तृतस्त्वाभि' रक्षतु।।१।।

ऊर्ध्वस्तिष्ठ रक्षन्नप्रमादमस्तृतेमं
मा त्वा दभन् पणयो यातुधानाः।
इन्द्र इव दस्यूनव धूनुष्व पृतन्यतः
सर्वाञ्छत्रून् वि षहस्वास्तृतस्त्वाभि रक्षतु।।२।।

शतं च नः प्रहरन्तोऽभिघ्नन्तो न तस्तिरे।
तस्मिन्निन्द्रः पर्यधत्त चक्षुः प्राणमथो बल-
मस्तृतस्त्वाभि रक्षतु।।३।।

इन्द्रस्य त्वा वर्मणा परि धापयामो
यो देवानामधिराजो बभूव।
पुरस्त्वा देवाः प्र णयन्तु सर्वे-
ऽस्तृतस्त्वाभि रक्षतु।।४।।

---

४.२३.१ कख का. सा. अ.।
ग उ. तन्ते . . .;
ग-ङ का. . . . वर्चसोजसे * * . . . तष्ट्वाभि *।
ङ उ. चास्तृतत्वाभि *।।
.२ का. . . . स्तिष्ठंरक्षंनप्रमादसम्भृतेमनु * * दभं * यातुधानां इन्द्रीववधस्यूदविधूष्व पृदन्यतः सर्वांश्छत्रृन् * . . . स्तृतः;
ख उ. * * * (म. दभन) पृ(ज.प्र)णयो *।
ग वा, म. . . . धू → धुनुष्व *;
घ वा. सर्वान् . . .;
ङ म. . . . स्तृत। वा, ज. . . स्तृतः।।
द्र. ३-६ स्त्वाभि रक्षतु इत्यूह्यम्। ३का. . . न * भिजन्तो * तस्त्रिरे। यस्मिनि . . .;
३-६ एते मन्त्राः काश्मीरीये ६, ५, ३, ४ इति क्रमेण पठिताः।
४ क का . . . धामो; ख का. नास्ति। उ. जो . . .।
ग का. पुनस्त्वादेवाप * * त्वस्तृतः;

+अस्मिन्मणावेकशतं वीर्याणि
सहस्रं प्राणा अस्मिन्नस्तृते।
व्याघ्रः शत्रूनधि तिष्ठ सर्वान्
यस्त्वा पृतन्यादधरः सोऽस्त्वस्तृतस्त्वाभि रक्षतु।।५।।

पै. १२.५.२क घृतादुलप्तो मधुमान् पयस्वान्
सहस्रं प्राणः शतयोनिर्वयोधाः।
शम्भूश्च मयोभूश्चोर्जस्वांश्च
पयस्वांश्चास्तृतस्त्वाभि रक्षतु।।६।।

यथा त्वमुत्तरो असो असपत्नः सपत्नहा।
सजातानामसो वशी तथा त्वा सविता कर-
दस्तृतस्त्वाभि रक्षतु।।७।।

४.२४

अपश्च रपश्चोष्मा च बाष्पश्च।
पै.४.२४.६ गघ द्रः शोकश्चाभीशोकश्च तृतीयेकश्च परेपरश्च
ते तक्मान इतो नश्यत।।१।।

---

५ का. . . . मनामेकशतं * * * यस्मिन्नस्रिरे व्याघ्रशतृनभि * * . .
. पृदेन्या . . . स्तृतः;
क वा. अस्मिन्मृणादेक . . .; म, ज. . . . न्मृणावे . . .;
ग उ. . . . सर्वा;
६ कख का. . . . तुल्लब्धो . . . ्यां पयस्वा * * . . . र्वयोधा।
क वा. . . . दुलु → लप्तो . . .।
ग का. . . . र्जस्वांच्च;
७ क का. . . . रोसौसपत्नस् *।
ग वा, ज. . . . . मसो → यो *;
ङ उ. . . . . स्तृतत्वाभि *।।ऋ७।।२३।।
४.२४.१ का. . . . . रवश्चो . . . वाःपश्च . . .
श्चाभिविषोक तृती . . . * तक्मनेतो *।
क वा. . . . रवश्चो . . .; घ म. . . . परेव(→ प)रश्च;
ङ वा. . . नश्यत (:→ ऽ)।। ज. . . . नश्यत (+:)।।

वेद वै ते तक्मन्नामाग्रिष्टं नामासि।
तं त्वेतोप नयामः शनि तक्मा।।२।।

वृत्रस्य हरोसि नभसो नपात्।
द्यौश्चास्मत् पृथिवी च तक्मानं नाशयतामितः।।३।।

पञ्चप्सिनिर्नाम ते माता स उ एकप्सिनिरुच्यसे।
तस्याहं वेद ते नाम स तक्मन् निरतो द्रव।।४।।

शौ.१.२५.२ग, औदुम्बलश्च नामासि प्रियातिथिश्च।
३ग द्रः तं त्वेतो नाशयामसि ब्रह्मणा वीर्यावता।।५।।
शौ.४.३७.११ ङ्च
योऽसि जल्पश्च+ लपंश्चावां च तपश्च।
पै.४.२४.१गघ द्र. तृतीयेकश्च मौञ्जिगलश्च ते तक्मान
इतो नश्यत।।६।।

---

२ का. . . . . तक्मंनामा . . . त्वेतोविनयामस्यनुतक्मां;
क उ. . . . .तक्मंनामा
द्र. ख < अग्निष्ट्वं ? गघ . . . . नयामस्यनु तक्मन्?
३ क का. * रोमि नभस्यो *।
ख वा. . . . स्म → स्मात्; ग. म. नाशयामितः।
४ कख का. पञ्चपत्सुन्त्रिनाम * * असूयेकप्सुनृत्यसे।
ख वा. . . . निर्ण्णाम * *;
घ का. श तक्मं . . . ध्रुवः; उ * तक्मं . . . .।।
म. . . . निरितो *।।
५ का. ओदुरस्य . . . . तन्वेतो * * . . . वतां;
क वा, ज. औदुम्वल → रश्च . . .;
६ का. * * जलपश्चलपश्चांमागुश्च तपैश्च। . . . श्चपरेपरश्च * तक्मानैतो नचत।
क उ. * षिसत्पश्च . . .;
ख वा. . . . श्चावांश्च → च . . .। ज. . . . श्चावाञ्च → श्च . . .।
ग वा, ज. . . . मौजिङ्गलश्च, घ वा. * * * नश्यत (+:)।।

विकिलीत विलोहित विकाशक्रंदरञ्जन।
गिरिं गच्छ' धूमकेतो हृषे नमांसि सन्तु ते।।७।।

बृहत्त्वमग्रे रक्षो अधमं जहि
मध्यमं न्युत्तमं शृणीहि।
शौ.१६.१०.४क शं नो अग्निर्ज्योतिरनीको अस्तु
ऋ.६.७५.१० ख शं द्यावापृथिवी अनेहसा।।८।।

मातेव पितेवाभि रक्षतैनं
मुञ्चतैनं पर्यंहसः।।६।।

४.२५

शौ.४.१०.१ वाताज्जातो अन्तरिक्षाद्विद्युतो ज्योतिषस्परि।
स नो हिरण्यजाः शङ्खः कृशनः पात्वंहसः।।१।।

---

७ कख का. विकिलेदविरोहतुवृकामष्कलित्यर्जुन।
क वा. विकिली → लित * ; म$_1$ विकि → विलीतवि (र्वि?) लो . . .;
म$_2$. विविलीतर्विलोहित;
द्र. म$_2$. म$_1$.कृतपाठमेवानुसरतीति प्रतीयते।
ख वा. विकास → शक्रं . . .। ज. . . . त → दरञ्जन।
घ वा. * नमां * *।। ज. * नमांसंतु (→सन्तु) *।
म. * * संतु *।। का. ऋषेणमांससंदते।।

८ का. . . . * अधिसं * * नुत्तमं *। * * . . . रनेको * सं * यनेहसा।
क उ. वृहत्वमग्ने . . . .;
ख वा. . . . शृणिहि। म. . . . शृणुहि। ज. * मध्यम . . .।
ग वा. सन्नो . . .; म, ज. श्नो (म. ऽग्नि) . . ।
घ म. सं * *।।

६ क का. . . . . पितेवरक्षत एनं;
वा, म. . . . . पितेवा अ(→ ऽ वा)भि . . .,

४.२५.१ ख म. . . . . ज्योतिसस्परि। ग का. * * . . ण्यदाशंखष्;

शौ.४.१०.६क-घ हिरण्यानामेकोसि सोमादधि जज्ञिषे।
रथेसि दार्शत इषुधौ रोचनस्त्वम्।।२।।

शौ.४.१०.२ यो अग्रतो रोचनावान् समुद्रादधि जज्ञिषे।
शङ्खेन हत्वा रक्षांस्यत्रिणो वि षहामहे।।३।।

ये अत्रिणो यातुधाना रक्षसो ये किमीदिनः।
सर्वां छङ्ख त्वया वयं विषूचो वि षहामहे।।४।।

शौ.४.१०.३ शङ्खेनामीवाममतिं+ शङ्खेनोत सदान्वाः
शङ्खो नो विश्वभेषजः कृशनः पात्वंहसं।।५।।

शौ.४.१०.४ दिवि जातः समुद्रतः सिन्धुतस्पर्याभृतः।
स नो हिरण्यजाः शङ्ख आयुष्प्रतरणो मणिः।।६।।

शौ.४.१०.७ देवानामस्थि कृशनं बभूव
तदात्मन्वच्चरत्यप्स्वन्तः।
तं ते बध्नाम्यायुषे वर्चस
ओजसे च बलाय च +कार्शनस्त्वाभि रक्षतु।।७।।

**इति चतुर्थकाण्डे पञ्चमोऽनुवाकः**

---

२ खं का. संहोसाचधि * । वा, म. . . . यज्ञिषे।
गघ का. रथेषुदर्शतमिषधौ . . .।
३ क का. * ग्रतो . . . वां; खग का. सा. अ.।
ख उ. . . . . . यज्ञिषे।
४ का. * त्रिणो . . . धानां . . . सर्वांश्छख * * * * वुधामहे।
ख वा. * जे *। ग म. * च्छङ्ख * *;
५ कख का. . . . . . नामिवामवद्यं . . . . तस्सदान्वा।
क उ. .नामी (वा. → म्नी) याममतिं; ख वा. शङ्खे (→ ङ्खो) नोतः *।
६ ख म. . . . . . . स्परियाभृतः।
गघ का. सा. अ.।
७ का. . . . . . मस्त * * तदात्मंनच . . .। * * . . . षे वर्चसे
बलाय * कार्षिणस्त्वाभि * z५z अनुवा ५।।z
क म. . . . . . मस्ति ख $म_2$. . . . . न्वकरत्य . . . .।
ग उ. तन्ते . . . .
ङ उ. कार्श्य (म.र्श्व) स्त्वाभि *।।२५।।ऋ७।।अ५।।

द्र. कार्शन- इति पाठः दुर्गामोहनपादैः शोधपूर्वकं स्थिरीकृतोऽस्माभिरपि रक्षितः। शौ. मू. को. कर्शनस्।

## ४.२६

ऋ.८.६१.१　कन्या वारवायती सोममपि श्रुताविदत्।
अस्तं भरन्त्यब्रवीदिन्द्राय सुनोमि त्वा
शक्राय सुनोमि त्वा।।१।।

ऋ.८.६१.२　असौ य *एषि वीरको गृहंगृहं विचाकशत्।
इमं जम्भसुतं पिब धानावन्तं करम्भिण-
मपूपवन्तमुक्थिनम्।।२।।

ऋ.८.६१.४　कुविच्छकत्' कुवित् करत् कुविन्नो वस्यसस्करत्।
कुवित् पतिद्वितो यतीरिन्द्रेण सङ्गमामहै।।३।।

ऋ.८.६१.३　आ चन त्वा चिकित्सामोधि चन त्वा नेमसि।
शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव।।४।।

---

४.२६.१.　　का. * * सोममश्रुतावदत्। हस्तं भरंत्य . . . शनिममि * * शनिममि *।
ग　म. * भरंत्य . . . .;
२　कख　का. असूयेषु * * विचकशत्; क उ. * * एष *;
ग　उ. * जम्मस (म.शं) तं *;
ङ　वा, ज. . . . णमुपवदन्त् . . . ।। म. . . . णमपवन्त . . . ।।
३　क　का. सा. अ.।
ख　उ. . . . . अस्यसस्करत्।
गघ　का. कुवित्सतियशोयती . . . . मही।
वा. . . . . तिद्युतोजती . . . . वहै।।
द्र.　का. उ. पुस्तिकासु ऊष्मवर्ण- तकारयोर्विपर्यासदर्शनात् ऋग्वेदीयः '. . . . पतिद्विषो' इति सम्यगेवेति प्रतीयते।
४　क　का. सा. अ.।
घ　उ. . . . येन्द्रो * *।।

ऋ.८.९१.५ इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय।
शिरस्ततस्योर्वरामादिदं म उपोदरे।।५।।

ऋ.८.९१.६ असौ च या न उर्वरादिमां तन्वं मम।
अथो ततस्य यच्छिरः+ सर्वा ता रोमशा कृधि।।६।।

ऋ.८.९१.७ खे रथस्य खेऽनसः खे युगस्य शतक्रतो।
अपालामिन्द्र *त्रिष्पूत्व्यकृणोः सूर्यत्वचम्।।७।।

४.२७

दिवस्पृष्ठे मधुपृचः सुपर्णाः
पञ्चाशत्ते भुवनस्य गोपाः।
आनुजावरमनुरक्षन्त उग्रां
येषामिन्द्रं वीर्यायैरयन्त।।१।।

---

५ ख ज. . . . . * रोह → धय।
ग वा, ज. . . स्तदस्यो . . . .; घ का. . . . मा *।
घ वा. . . . . मौपदरे ।।

६ कग का. . . . उर्वातिरा इमां तत्वस्परि। * तदस्तु यश्छिरस्;
उ. * तदस्य यत्शिरः (वा. यछिरः) * * रोमसा *।।

७ कख का. ख * . . . . यो। गस्यशक्रतो।
ख वा. . . . क्रतोः। ज. ':' अस्पष्टं योजितं दृश्यते
घ कां. . . . कृणोत् * z9z
गघ उ. . . . . त्रिस्पू (→ स्पू वा.) त्वा कृणोत् *।। ऋ७।।२६।।
द्र. अकृणोः - स्- कारस्य त्- कारापत्तिः कोशेषु बहुलं दृश्यते। तेन दुर्गामोहनपादकृतोऽयं शोधो रक्षितोऽस्माभिः।

४.२७.१ का. . . . . सुपर्णष्पञ्चशते . . . रत्त * तेषा . . . . वीर्याईरयन्त;
क वा, म. . . . . स्पृष्टे . . . .; ख, वा ज. पञ्चाशते . . .;
ग म, ज. आनुयावर् . . .;

पुरोहितः परमेष्ठी स्वराड्
ज्यायाभीवर्धमस्मा अकृणोद् बृहस्पतिः।
तेन सपत्नानधरान् कृणुष्व
क्षेमे पशून् बहुलान् वर्धयित्वा
जैत्रायोद्यातु रथवाहनं ते।।२।।

गोभाजमंसं तव ये समानाः
सर्वे समग्रा दधृगा भरन्त।
अभि वर्धस्व भ्रातृव्यानभि ये त्वा पृतन्यतः।।३।।

नि पिण्ढि सर्वान् धूर्वतोऽभीवर्धो यथाससि।
शौ.१.२९.४क　अभीवर्धमभीभवमभीषेणं महागणम्।
४.८.४ गघ　विशस्त्वा सर्वा आयन्त्वापो दिव्याः
पयस्वतीः।।४।।

---

२　कघ　का. * * सदाज्ञायाभि . . . स्माकृणोद् * * सपत्ना . . . वर्धयेत्वा;
खं　वा. . . . . अ(→ ऽ)कृणोद् *।
घ　ज. * पशून् → न * * ;
ङ　उ. जयीत्रा (ज. जै (यी → δ) त्रा)योज्यातु . . . नन्ते।
द्र.　का. पत्रस्याधोभागे "वृहस्पभसूक्तः" इति
३　का. गोभाचमूषन्तये समानस् * * दधृशा *। . . . पृदन्यतः;
क　वा. गोभायमंसं . . .; म. . . . सन्तव * *;
४　का. * षिण्ढि सर्वा * भीभीवर्धतो . . . .। अभिवर्धमभि . . .
. वांश्छंत्वापो * *;
क　वा, म. * * सर्वा *; ख ज. ऽ भिवर्द्धो . . .।
गघ　वा. अभिवर्द्धमभिभवमभिषेणं *।
ज. . . . . मभि → भीषेणं *।।
च　वा. आयंत्वापो . . . .।।

अभि वर्धस्व प्रजया वावृधानो-
ऽभ्यनीकैः पशुभिर्भवाति।
ब्रह्म राजन्यैर्विश्वैर्वावृधानः
शूद्रैरतीहि सभया पृतन्यतः।।५।।

वर्धस्व क्षेत्रैः प्रथस्व प्रजया
वर्धस्व वीरैः पशुभिर्बहुर्भव।
श्रिया शुक्लैर्यतमस्त्वा पृतन्या-
दासस्तुभ्यं स बलिहृत्याय तिष्ठतु।।६।।

४.२८

ऋ.१.१०६.१-७ इन्द्रं मित्रं वरुणमग्निमूतये
मारुतं शर्धो अदितिं हवामहे।
रथं न दुर्गाद्वसवः सुदानवो
विश्वस्मान्नो अंहसो निष्पिपर्तन।।१।।

त आदित्या आ गता सर्वतातये
भूत देवा वृत्रतूर्येषु संभुवः।
रथं न दुर्गाद्वसवः सुदानवो
विश्वस्मान्नो अंहसो निष्पिपर्तन।।२।।

---

५ का. अभी * * * . . . वामि।
द्र. उ. ख ऽ नास्ति।
घ का. शूद्रै (→ द्रै) रतीह * पृदन्यतः;
६ कख का. * * प्रदतस्वं प्रजय * * . . . र्भवः;
क ज. * क्षेत्रै * *;
६ गघ का. * सउल्कैर्यमस्त्वापृदन्यादापृतस्तुभ्यं शपलऋत्याय तिष्ठतु। ओं दापृतस्तुभ्यं शपलंऋत्यायतिष्ठतु z२z
घ म. . . . . वलिहृत्या(→ दया)य * ।।
उ. काण्डिकान्ते मङ्गलचिह्नादीनि।
४.२८.१ खग उ. * श्रद्धो * *। रथन्न . . .;
ग का. . . . सुदानुवो;
२ ग का. . . . . सुधानवो;
क उ. 'आ' इति नास्ति। ख उ. . . . संभवः।
द्र. उ. गघ नास्ति। एवं पञ्चमं मन्त्रं यावत्।

अवन्तु नः पितरः सुप्रवाचना
उत देवी देवपुत्रे ऋतावृधा।
रथं न दुर्गाद्वसवः सुदानवो
विश्वस्मान्नो अंहसो निष्पिपर्तन।।३।।

नराशंसं वाजिनं वाजयन्तं
क्षयद्वीरं पूषणं सुम्नैरीमहे।
रथं न दुर्गाद्वसवः सुदानवो
विश्वस्मान्नो अंहसो निष्पिपर्तन।।४।।

बृहस्पते सदमिन्नः सुगं कृधि
शं योर्यत्ते मनुर्हितं तदीमहे।
रथं न दुर्गाद्वसवः सुदानवो
विश्वस्मान्नो अंहसो निष्पिपर्तन।।५।।

इन्द्रं कुत्सो वृत्रहणं शचीपतिं
काटे निवाढ ऋषिरह्वदूतये।
रथं न दुर्गाद्वसवः सुदानवो
विश्वस्मान्नो अंहसो निष्पिपर्तन।।६।।

ऋ.४.५५.७ द्रः देवैर्नो देव्यदितिर्नि पातु
देवस्त्राता त्रायतामप्रयुच्छन्।
तन्नो मित्रो वरुणो मामहन्ता-
मदितिः सिन्धुः पृथिवी उत द्यौः।।७।।

---

३ कग का. सा. अ.।
४ ख का. सा. अ.।
द्र. ग. वसव इत्यतो नास्ति।
५ का. * सदमित्र सुवां * * . . मनुरीतं तुरीमहे। रथन्न दुर्गा z
क वा. * सदमिनः * *;
ख वा. सञ्जोर्यत्ते . . .। म. सं. . . .; ज. संजोर्यत्ते . . .।
६ का. ख कटे . . . दुतये। क,ग सा. अ.।
क वा . . . सचीपतिं; ख उ. . . . रषिरह्व . . .।
७ कख का. . . . न्नोदेव्यदितिन्नि * देवा . . . युश्छन्;
क उ. . . . . तिर्न *;
ख वा, म. . . . युछन्।
द्र. का. पत्रस्योपरिभागे ''इन्द्रंमित्रंदीवीसू'' इति। ततः 'अपन्नाष्टकंत' इति।

## ४.२६

ऋ.१.९७.१-८
शौ.४.३३.१-८द्रः अप नः शोशुचदघम्। अग्ने शुशुग्ध्या रयिम्।।१।।
अप नः शोशुचदघम्।
सुक्षेत्रिया सुगातुया वसूया च यजामहे।।२।।
अप नः शोशुचदघम्।
प्र यद् भन्दिष्ठ+ एषां प्रास्माकासश्च सूरयः।।३।।
अप नः शोशुचदघम्।
प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयम्।।४।।
अप नः शोशुचदघम्।
प्र यदग्नेः सहस्वतो विश्वतो यन्ति भानवः।।५।।

---

द्र. ४.२६ अत्र काण्डिका उ. पुस्तिका अनुसृत्य निर्वर्तिता। काश्मीरीयपुस्तिका तु ऋग्वेदमेवानुसरतीति प्रतीयते। तत्र अपन्ना अष्टौ शुचये इत्यादिवाक्यम् अपनोऽष्टौ शुचये इत्यनुक्रमणिकावाक्यमेवाशुद्धमुद्धृतम्। आथर्वणविनियोगस्तु (कौ.३६.२२) अन्यथा निर्दिष्टः। तेन काश्मीरीयमन्त्रविन्यासः ऋग्वेदमूलकत्वान् नादृतोऽस्माभिः।
काण्डिकारम्भे का. औंकुत्स ऋषिः गायत्र्यं श्छन्दः अग्निर्देवता अपन्ना अष्टौ शुचये विनियोगः zz

१ का. * * शोशुचदगग्ने शुचकदा *। अपनश् शोशुचदघं।
ख वा. * शुशुग्धा *।। ज. * शुषुग्ध्या *।।
२ का. यया ऋग्वेदे शौनकीये चाथर्ववेदे इहापि अप नः इत्यादि वाक्यम् प्रतिमन्त्रं तृतीयपादरूपेण आवर्तते। अत्र तु अपन्नश्॰ इत्यादिः पाठः।
२ क =का. गपादः। एवमा परि समाप्ति। उ. ऊह्यः पादः। एवमाषष्ठम्।
ख का. सुक्षेत्रियां सुघा . . .;
ग उ. वसुया * *।।
३ खग का. * * भन्धिष्ट एतां प्रास्माकसश्च *;
ख उ. * यध्वंतिष्ठ;
ग वा. प्रास्माकाशश्च *;
४ ग. का. जायेमहे * ति *;
उ. * व्रते *।।
५ ख का, ज. * यदग्ने *;

अप नः शोशुचदघम्।
त्वं हि विश्वतोमुख विश्वतः परिभूरसि।।६।।

अप नः शोशुचदघम्।
द्विषो नो विश्वतोमुखाति नावेव पारय।।७।।

४.३०

देवाः शरणकृतः शरणा मे भवत
प्राच्या दिशोऽग्निना राज्ञाध्यक्षेण।
यशा भूयासं यशसं मा कृणुत
चारुमन्नादं परा द्विषन्तं शृणीत।।१।।

देवाः शरणकृतः शरणा मे भवत
दक्षिणाया दिश इन्द्रेण राज्ञाध्यक्षेण।
यशा भूयासं यशसं मा कृणुत
चारुमन्नादं परा द्विषन्तं शृणीत।।२।।

---

७ खग वा. . . . . मुखाऽति (उ. नावेद *।।)
ग ज. . . . . पारयः।।ऋ७।।२६।।
द्र. उ. मन्त्रसंख्या सप्तेति सर्वत्र।
का. सनस्सिन्धुमिवनावयाते पर्षस्स्वस्तये। अपन्नश्शोशुचदघं Z४Z इत्यधिकम्। शौ. ऋ. चू तथा, नतु उ.। उपरि भुमिका द्रष्टव्या।
४.३०.१ का. ओँ देवश् . . . प्राच्यां . . . यससं . . . चारुमन्त्रादं . . . सृणीतः। द्र. पत्रस्य दक्षिणपार्श्वे षड्तंसूक्तं इति।
क वा. . . . भवतः; ज. देवा . . .;
ख ज. * दिशो अग्निना *;
ग म. * * यशसम्मा; घ ज. . . . सृणीत।।
२ का, उ. 'देवाः . . . मे' इति नास्ति। 'यशा भूयासं' इत्यतोऽपि सर्वमूह्यम्। 'भवत . . . ध्यक्षेण' इत्येव भागः पठितः।एवमष्टमं मन्त्रं यावत्।
ख का. दक्षिणया दिशो . . .;

देवाः शरणकृतः शरणा मे भवत
प्रतीच्या दिशो वरुणेन राज्ञाध्यक्षेण।
यशां भूयासं यशसं मा कृणुत
चारुमन्नादं परा द्विषन्तं शृणीत।।३।।

देवाः शरणकृतः शरणा मे भवतो-
दीच्या दिशः सोमेन राज्ञाध्यक्षेण।
यशा भूयासं यशसं मा कृणुत
चारुमन्नादं परा द्विषन्तं शृणीत।।४।।

देवाः शरणकृतः शरणा मे भवत
ध्रुवाया दिशो विष्णुना राज्ञाध्यक्षेण।
यशा भूयासं यशसं मा कृणुत
चारुमन्नादं परा द्विषन्तं शृणीत।।५।।

देवाः शरणकृतः शरणा मे भवतो-
र्ध्वाया दिशो बृहस्पतिना राज्ञाध्यक्षेण।
यशा भूयासं यशसं मा कृणुत
चारुमन्नादं परा द्विषन्तं शृणीत।।६।।

देवाः शरणकृतः शरणा मे भवतो-
त्तमाया दिशः प्रजापतिना राज्ञाध्यक्षेण।
यशा भूयासं यशसं मा कृणुत
चारुमन्नादं परा द्विषन्तं शृणीत।।७।।

---

३ क वा. भवतः; एवं चतुर्थपञ्चमाष्टममन्त्रेषु।

४ कख का. भवत उदीच्यां . . .; एवं ६ कख, ७कखपादेषु अपि सन्ध्यभावः।
वा. भवतः प्रतीच्यादिशोऽग्निना . . .;

५ ख म. धृवाया . . .;

देवाः शरणकृतः शरणा मे भवत
परमाया दिशः परमेष्ठिना राज्ञाध्यक्षेण।
यशा भूयासं यशसं मा कृणुत
चारुमन्नादं परा द्विषन्तं शृणीत।।८।।

देवाः शरणकृतः शरणा मे भवत
सर्वाभ्यो दिग्भ्य ईशानेन राज्ञाध्यक्षेण।
यशा भूयासं यशसं मा कृणुत
चारुमन्नादं परा द्विपन्तं शृणीत।।९।।

**इति चतुर्थकाण्डे षष्ठोऽनुवाकः**

४.३१

शौ.३:१६.१-७ प्रातरग्निं प्रातरिन्द्रं हवामहे
ऋ.७.४१.१-७ प्रातर्मित्रावरुणा प्रातरश्विना।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं
प्रातः सोममुत रुद्रं हुवेम।।१।।

प्रातर्जितं भगमुग्रं हुवेम
वयं पुत्रमदितेर्यो विधर्ता।
आध्रश्चिद् यं+ मन्यमानस्तुरश्चिद्
राजा चिद् यं भगं भक्षीत्याह।।२।।

---

८ क वा. भवतः;

९ कख का. सा. अ.। ज. देवा शरणकृत . . .;
ग वा, म. * * . . . सम्मा *;
गघ का. . . . . कृणुत द्विषंतं सृचृणीतः ZZ५Z अनु ६Z

४.३१.२ ग का. अग्निश्चिद्यं . . . स्तुरश्चि; वा, म. आध्रश्चिज्यं . . . .;
ज. . . . . श्चिज्य → य्यमन्य . . .; वा. . . . स्तिरश्चिद्;
घ उ. * चिज्यं . . .।।

भग प्रणेतर्भग सत्यराधो
भगेमां धियमुदवा* ददन्नः।
भग प्र णो जनय गोभिरश्वै-
र्भग प्र नृभिर्नृवन्तः स्याम।।३।।

उतेदानीं भगवन्तः स्या-
मोत प्रपित्व उत मध्ये अह्नाम्।
उतोदिते मघवन् सूर्ये
वयं देवानां सुमतौ स्याम।।४।।

भग एव भगवाँ अस्तु देवा-
स्तेन वयं भगवन्तः स्याम।
तं त्वा भग सर्व इज्ञोहवीति
स नो भग पुरएता भवेह।।५।।

समध्वरायोषसो नमन्त
दधिक्रावेव शुचये पदाय।
अर्वाचीनं वसुविदं भगं नो
रथमिवाश्वा वाजिन आ वहन्तु।।६।।

---

३ क का. * प्रणेते . . . .; वा. प्रेणे → प्रणोत . . . .;
ख उ, का. . . . मुतवा . . .; का. . . . उदंनः;
गघ का. सा. अ.।

४ खग का. . . . अह्ना . . . मघत् *; ग उ. . . . सूर्यो;

५ क का. ** भगवामस्तु . . .; वा. . . . भगवां * . . .;
म, ज. . . . . भगवाङ् . . .;
ख वा, ज. ** भगवन्त *।
ग का. ** भगस् सर्वे . . .;
का, वा, $म_2$. . . इज्ञोहवीमि; $म_1$ . . . हवीमि → ति;
घ का. ** भगष् . . . z

६ क,घ का. सा. अ.।
ख ज. . . . सुचये *। ग उ. * वसुमिदं भगन्नो;

अश्वावतीर्गोमतीर्न उषासो
वीरवतीः सदमुच्छन्तु+ भद्राः।
घृतं दुहाना विश्वतः प्रपीता
यूयं पात स्वस्तिभिः सदा नः।।७।।

४.३२

शौ.४.३२.१-७ यस्ते मन्योऽविधद्वज्र सायक
ऋ.१०.८३.१-७ सह ओजः पुष्यति विश्वमानुषक्*।
साह्याम दासमार्यं त्वया युजा
वयं सहस्कृतेन सहसा सहीयसा।।१।।

मै.४.१२.३ मन्युरिन्द्रो मन्युरेवास देवो
तैब्रा २.४.१.११ मन्युर्होता वरुणो जातवेदाः।
मन्युर्विश ईड़ते मानुषीर्याः
पाहि नो मन्यो तपसा सजोषाः।।२।।

---

७ क का. सा. अ.।
ख उ. वीरमतीः . . .; का. . . . मिच्छन्तु *; वा. . . . मुछन्तु *।
म, ज. . . . मुत्सन्तु *।
ग का. * * * प्रवीणा;
द्र. म$_1$ 'भद्राः . . . दुहाना' इति नष्टम्।
घ उ. * पातः . . . .।।ऋ७।।३१।।
४.३२.१क का. . . सद्यो . . .; उ. . . मन्योविदध . . *;
ख का. * * पुष्यद्विश्वंमनुषं;
वा, म. . . . विश्वंमानुषं। ज. . . . विश्वमानषं।
ग उ. साज्याम दासमाज्यं * *;
घ का. . . . महीयसा।
२ ग का. . . . . . षीर्यषु; घ वा, म. . . . सयोषाः।।

अभीहि मन्यो तपसस्तवीयान्
तपसा युजा वि जहि शत्रून्।
अमित्रहा वृत्रहा दस्युहा च
विश्वा वसून्या भरा त्वं नः।।३।।

मै.४.१२.३ क-ग त्वं हि मन्यो अभिभूत्योजाः
स्वयम्भूर्भामो अभिमातिषाहः।
विश्वचर्षणिः सहुरिः सहीयाँ
अस्मास्वोजः पृतनासु धेहि।।४।।

अभागः सन्नप परेतो अस्मि
तव क्रत्वा तविषस्य प्रचेतः।
तं त्वा मन्यो अक्रतुर्जिहीड़ाहं
स्वा तनूर्बलदावा न एहि।।५।।

अयं ते +अस्युप न एह्यर्वाङ्
प्रतीचीनः सहुरे विश्वदावन्।
मन्यो वज्रिन्नुप न आ ववृत्स्व
हनाव दस्यूँरुत+ बोध्यापे।।६।।

---

३ क का. . . . स्तवीर्यं (→ यां); म. . . . स्तवायां;
खग का. सा. अ.।
घ वा. . . . . त्वन्नः।।

४ ख का. सा. अ.। उ. स्वयंभू . .।
गघ का. ** सहीयानस्मा . . .।
घ म. अस्मात्स्वोजः **।।

५ क उ. * संनपरेतो * (ज. अस्मै; म. ऽस्मि)।
ख का. सा. अ.; वा. . . . प्रचेत (+स):
ग वा. तत्वा . . .; घ का. सा. अ.। ज. * तनुर्व . . .।।

६ क का. ** अस्स्युप मे ह्यर्वाङ्; उ. अयन्तेस्युप . . .;
खग का. सा. अ.। ग उ. * वज्रिंनुप (का. - ज्रिनुप) . . .;
घ का. * दस्यूनुत पोध्यापे;
वा, म. * दस्यूनुरुत (वा. . . वध्यापे); ज. * दस्यूनरुत . ।।

| | |
|---|---|
| ऋ.८.१००.२द्रः<br>तै.१.७.१२.२द्रः<br>मै.१.१०.३द्रः<br>काठ.६.६द्रः<br>शौ.७.३.१द्रः<br>पै.२०.२.१द्रः | अभि प्रेहि दक्षिणतो भवा नो<br>अधा वृत्राणि जङ्घनाव भूरि।<br>जुहोमि ते धरुणो मध्वो अग्र-<br>मुभा उपांशु प्रथमा पिबेव।।७।। |

४.३३

| | |
|---|---|
| शौ.४.२३.१<br>तै.४.७.१५.१<br>मै.३.१६.५<br>का.२२.१५<br>तै.ब्रा.३.६.१६.४ | अग्नेर्मन्वे प्रथमस्य प्रचेतसः<br>पाञ्चजन्यस्य वहुधा यमिन्धते।<br>विशोविशः प्रविशिवांसमीमहे<br>स नो मुञ्चत्वंहसः।।१।। |
| शौ.४.२३.४<br>कख तै.४.१.५.५<br>मै.२.७.५<br>क<br>का.१६.५<br>वाज.११.५३ | *सुजातं जातवेदसमग्निं* वैश्वानरं विभुम्।<br>हव्यवाहं हवामहे स नो मुञ्चत्वंहसः।।२।। |

---

७ ख का. -धा ववृत्राणि जंघनाच *।
उ. . . . जंहनाव; म. . . . हूरि।
ग का. * * धरुणे * *; वा, म. . . वध्वो *;
घ म. . . . पिवे → पेव।। ज. . . . पिपेव।।ऋ७।।३३।।

४.३३.१ ख म, ज. . . . यमिन्वते। वा. . . . यमिन्ध(न्व?)ते।
ग का. विशोविप्रिशिशिमांस . . .;
उ. . . . प्रविशिवाङ्स . . .;

२ क का, उ. सजातं . . . मग्निर्वै . . .।
ग उ. * * सः।। इतः परमूह्यम्। एवं षष्ठमन्त्रं यावत्।
द्र. सजातं जातवेदसमग्निरिति पाठस्य का, उ पुस्तिकासु अव्यभिचरितत्वेन दृष्टत्वेऽपि सर्वत्रान्यत्र सुजातमित्यादिपाठस्याव्यभिचरितत्वेनैव गृहीतत्वात्, अस्मदीयपुस्तिकासु कश्चित् लेखकप्रमाद एव वेदपारम्पर्ये क्वचिज्जात इति प्रतीयते।

शौ.४.२३.२ यथा हव्यं वहसि जातवेदो
यथा यज्ञं कल्पयसि प्रजानन्।
एवा देवेभ्यः सुमतिं ह्यावह
स नो मुञ्चत्वंहसः।।३।।

शौ.४.२३.३ यामन्यामन्नुपयुक्तं वहिष्ठं
कर्मन् कर्मन्नाभगम्।
अग्निमीडे रक्षोहणं यज्ञवृधं घृताहुतं
स नो मुञ्चत्वंहसः।।४।।

शौ.४.२३.५ येन ऋषयो वलमद्योतयन् युजा
येनासुराणामयुवन्त* मायाः*।
येनाग्निना पणीनिन्द्रो जिगाय
स नो मुञ्चत्वंहसः।।५।।

शौ.४.२३.६ येन देवा अमृतमन्वविन्दन्
येनौषधीर्मधुमतीरकृण्वन्।
येनेदं स्वराभरन्
स नो मुञ्चत्वंहसः।।६।।

---

३ क ज. यथा (क्ष → δ) * * *;
ख उ. . . . कल्पयतिं *;
ग का. . . सुमति . .; वा. . . . ज्यावह; म. . . . ज्या → ह्या-
वह; ज. * देवेभ्य * यावह;

४ क उ. यामंयामंनुप . . . वहिष्टं (→ ष्टः, वा);
का. . . . . मभ्यप . . . वयिष्टं;
खग का. सा. अ.। म, ज. * कर्मनाभगं।
ज. . . . . यज्ञवृद्धं *; शौ. 'अग्निमीडे' इति २य पादे।

५ क का. येनर्षयोबलमिद्योतयजा;
वा, ज. . . . मद्योतयन *;
ख उ. . . . मयिवन्त; का. यना . . . मयजन्त;
का, उ. . . . माया।
ग वा, ज. . . . पणिनिन्द्रो *; का. सा. अ.।

६ क उ. . . . मन्वविन्दं * ; खग का. सा. अ.।

| | |
|---|---|
| शौ.४.२३.७<br>तै.४.७.१५.२<br>मै.३.१६.५<br>का.२२.१५<br>तै.ब्रा.३.६.१६.४ | यस्येदं प्रदिशि यद्विरोचते<br>यज्ञातं जनितव्यञ्च केवलम्।<br>स्तौम्यग्निं नाथितो जोहवीमि<br>स नो मुञ्चत्वंहसः।।७।। |

४.३४

| | |
|---|---|
| शौ.४.२५.१<br>तै.४.७.१५.७<br>मै. ३.१६.५<br>काठ.२२.१५ | वायोः सवितुर्विदथानि मन्महे<br>यावात्मन्वद्विदथो यौ च रक्षथः।<br>यौ विश्वस्य परिभू बभूवथु-<br>स्तौ नो मुञ्चतमंहसः।।१।। |
| शौ.४.२५.२ | ययोः संख्याता वरिमाणि पार्थिवा<br>याभ्यां रजो गुपितमन्तरिक्षम्।<br>ययोः प्रयां नानु कश्चनानशे*<br>तौ नो मुञ्चतमंहसः।।२।। |

---

७ ख वा. . . . केवळं। का. . . . जनितंव्यंच *।
ज. . . . जनितव्यंच *।
ग का. सा. अ.।

४.३४.१ क उ. . . . विंदधानि *; म. * सवित . . .;
ख वा. यावात्मन्विद्वितथो . . .; म. . . . न्वद्वितथो * * रक्षतः।
कख का. वायो . . . वातमन्यूद्विषतो ये * रक्षतः;
ग का. सा. अ.।

२ क ज. ययो . . . .; का, ज. * संक्षाता . . .; वा. * सङ्ख्याता . . .; उ. . . . . परिमाणि *;
ख का. . . . गुस्थितमन्तरिक्षं;
ग वा. * प्रजां . . .; ज. * प्रजा . . .; वा, म. . . . नानुशे;
ज. . . . नानुषे;
का. . . . . षश्चनानुषे;
घ उ. तौ।। इतः परमूह्यम्। एवं षष्ठमन्त्रं यावत्।

शौ.४.२५.३ तव व्रते नि विशन्ते जनास-
+स्त्वय्युदिते प्रेरते चित्रभानो।
युवं *वायुः सविता च भुवनानि रक्षथ-
स्तौ नो मुञ्चतमंहसः।।३।।

शौ.४.२५.६ प्र सुमतिं सवितर्वाय ऊतये
महस्वन्तं मत्सरं मादयेथाम्।
अर्वाग्वामस्य प्रवता नि +यच्छथ-
स्तौ नो मुञ्चतमंहसः।।४।।

शौ.४.२५.५ रयिं मे पोषं सवितोत वायु-
स्तनू+ दक्षमा सुवतां सुशेवम्।
अयक्ष्मतां महो अस्मासु धत्तं
तौ नो मुञ्चतमंहसः।।५।।

शौ.४.२५.४ अपेतो *वायुः सविता च दुष्कृत-
मप यक्ष्मं शिमिदां सेधतं परः।
सं ह्यूर्जाः सृजथः सं बलेन
तौ नो मुञ्चतमंहसः।।६।।

---

३ क का. . . . . विशंत्वे *; म. . . . विशंते *;
ख का. -स्त्वैयते . . .; उ. - स्तय्युदिते * *।
द्र. का. शेषः सा. अ.।
गघ का. दिवं वायोस् * * * यश्छतस्तौ . . .।
उ. * वायोः . . . .।। शौ. * वायो . . .।।
४ क का. * * संमुमतिर्वा *;
वा. . . . युतये; म, ज. . . . युतये;
ख. का. महत्स्वंत *. मादयेतां। म * महत्सरं *।
ग वा. . . . . प्रपंता * यछथ-; म, ज, . . . यत्सथ-;
का. . . . . यश्छत -;
५ खग का. -स्तनो जक्षिवां सविता मुषवौ। अवे यक्ष्मतां मुहस्मासु *;
ख उ. स्तनु . . . .;
६ क उ. * वायोः * * * ; शौ. * वायो . . .;
क-ग का. * वायोस् . . . मुपे * ससमितां सेदतिम् पर * ह्यूर्जा सृजत मं *;

उप श्रेष्ठा न आशिषो
शौ.४.२५.७ देवयोर्धामन्नस्थिरन्⁺।
तै.४.७.१५.८
मै.३.१६.५ स्तौमि देवं सवितारं च वायुं
का.२२.१५ तौ नो मुञ्चतमंहसः।।७।।

४.३५

शौ.४.२७.१-७ मरुतां मन्वे अधि मे ब्रुवन्तु
तै.४.७.१५.११ प्रेमं वाजं वाजसाता अवन्तु।
मै.३.१६.५ ⁺आशूनिव सुयमां ह्व ऊतये⁺
का. २२.१५ ते नो मुञ्चन्त्वंहसः।।१।।

उत्समक्षितं व्यचन्ति ये सदा
ये वा सिञ्चन्तु रसमोषधीषु।
पुरो दधे मरुतः ⁺पृश्निमातॄं-
स्ते नो मुञ्चन्त्वंहसः।।२।।

पयो धेनूनां रसमोषधीनां
*जवमर्वतां कवयो य इन्वथ।
शग्मा भवन्तु मरुतः स्योना-
स्ते नो मुञ्चन्त्वंहसः।।३।।

---

७ क,ग का. सा. अ.।
ख का. देवयोर्ध्वमन्वस्थिरं। उ. . . . द्धर्मिंनस्थितन्;

४.३५.१ क-ग का. * मन्व . . . वोजो * वन्तु। आसूनिव * भूतये;
ग उ. आशुनिव * * उतये;
घ का, ज. * * मुञ्चत्वं . . .; म. * * मुञ्चंत्वं . .।।
द्र. का. एवं २,४।

२ का. . . . . यचन्ति * * यवा . . . मारुतः पृष्णिमातरं . . .;
उ. . . . षदा . . . पृश्निमातृस्ते।। उ. अत ऊह्यम्। एवं षष्ठं यावत्।

३ ख उ. यवपर्वतां (ज. -ता) . . .; का. यवसर्वतां . . . इन्वत्;
द्र. मन्त्रार्धे त्रयो यकाराः। तत्प्रभावात् जकारस्य यकारः। का. स-म-विपर्ययः प्रायिकः।
क,ग. का. सा. अ.

अपः समुद्राद्दिवमुद्वहन्ति
दिवस्पृथिवीमभि ये सृजन्ति।
येऽद्भिरीशाना+ मरुतश्चरन्ति
ते नो मुञ्चन्त्वंहसः।।४।।

ये कीलालैस्तर्पयन्ति ये घृतेन
ये वा वयो मेदसा संसृजन्ति।
य ईशाना मरुतो वर्षयन्ति
ते नो मुञ्चन्त्वंहसः।।५।।

यदीदिदं मरुतो मारुतेन
यदि देवा दैव्येनेदृगार।
युयमीशिध्वे* वसवस्तस्य निष्कृते-
स्ते नो मुञ्चन्त्वंहसः।।६।।

तै.४.७.१५.१२ तिग्ममनीकं विदितं सहस्वन्
मै.३.१६.५ मारुतं शर्धः+ पृतनासूग्रम्।
का.२२.१५ स्तौमि मरुतो नाथितो जोहवीमि
ते नो मुञ्चन्त्वंहसः।।७।।

**इति चतुर्थकाण्डे सप्तमोऽनुवाकः।**

---

४ कख का. सा. अ.
ग का. यद्भीशानां मुरुत . . .;
उ. येभिरी . . .;
५ का. कख * . . . स्तर्पयन्त्यो घृतेन य . . .।
६ क उ. यदीदं . . .; का. . . . मारुतो * ; ख का. सा. अ.।
ग का. यूयमेसिद्धे . . . . निष्कृधे ;
उ. यूयमीसिद्धे . . . ;
७ कख का. . . . वितत सहस्वं * शवः पृतनासुउग्रं;
वा. . . . सहस्वमा → न्मारुतं श्रद्धः . . . स्युग्रं;
क म. . . . विदतंसहस्व; ख उ. * श्रद्धः. . . .।
ग का. सा. अ.। वा, म. . . . योहवीमि;

## ४.३६

शौ.४.२६.१ तै.४.७.१५.१८ मै.३.१६.५ का.२२.१५
मन्वे वां द्यावापृथिवी सुभोजसी
ये *अप्रथेथाममिता योजनानि।
प्रतिष्ठे ह्यभवतं वसूनां
ते नो मुञ्चतमंहसः।।१।।

शौ.४.२६.२
प्रतिष्ठे हि बभूवथुर्वसूनां
प्रवृद्धे देवी सुभगे उरूची।
द्यावापृथिवी भवतं मे स्योने
ते नो मुञ्चतमंहसः।।२।।

४.२६.४
ये स्रोत्या* बिभृथो ये मनुष्यां
ये *अमृतं बिभृथो ये हवींषि।
द्यावापृथिवी भवतं मे स्योने
ते नो मुञ्चतमंहसः।।३।।

४.२६.५
ये उस्रिया* बिभृथो ये वनस्पतीन्
ययोर्वां विश्वा भुवनान्यन्तः।
द्यावापृथिवी भवतं मे स्योने
ते नो मुञ्चतमंहसः।।४।।

---

४.३६.१ ख का. ये प्रथेतासमिता *। उ. . . . ये प्रथेथा . . .।
ग का. सा. अ.।

२ क वा. * * बभुवतु . . .; का. * ह . . . .;
ख का. प्रविद्धे (सायण) * * उतूदी। वा. . . . * रूची।
म. . . . * रुची।
ग वा. . . . भवतम्मे *; घ उ. ते।। इतः परमूह्यम्।

३ क का. * प्रीत्याविभृतो * मनुष्या; वा. * श्रोत्रया . . .;
म,ज. * श्रोत्या * * मनुष्या;
ख का. * मृतं बिभ्रतो . . ..।
उ. * ऽ मृतं * *।। गघ नास्ति। एवं पञ्चमं यावत्।

४ क का. यत्र श्रिया बिभृतो . . .;
उ. * उश्रिया * * वनस्पतीं;

४.२६.६ ये कीलालैस्तर्पयथो ये घृतेन
याभ्यां नर्ते किञ्चन शक्नुवन्ति।
द्यावापृथिवी भवतं मे स्योने
ते नो मुञ्चमंहसः।।५।।

४.२६.३ असन्तापे सुतपसा हुवे वा-
मुर्वी गभीरे कविभिर्नमस्ये।
द्यावापृथिवी भवतं मे स्योने
ते नो मुञ्चतमंहसः।।६।।

४.२६.७ यन्मेदमभिशोचति येन वा
तै.४.७.१५.१४ येन वा कृतं पौरुषेयं न दैव्यम्।
मै.३.१६.५ स्तौमि द्यावापृथिवी नाथितो जोहवीमि
का.२२.१५ ते नो मुञ्चतमंहसः।।७।।

४.३७

शौ.४.२८.१ भवाशर्वी मन्वे वां तस्य वित्तं
ययोर्वां विश्वं यदिदं वितिष्ठते।
यावीशाते अस्य द्विपदो यश्चतुष्पद-
स्तौ नो मुञ्चतमंहसः।।१।।

---

५ क का. . . . स्तयंतो * घृते;
ख वा,ज. . . . किञ्चनः *।
६ क का. असंताप्य स्वतपसा . . .; वा. * षुतपसा . . .;
कख उ. . . . हुदेवामुवी. . .।
ग वा. * भवतम्मे *; घ उ. ते।।
७ का. क येनमेदमभि . . .; ख 'वा' इति नास्ति।
ग का.सा.अ.।वा, म. . . . योहवीमि।
४.३७.१ क का.सा.अ.।ख का. विश्वमिति नास्ति। एवं 'ग' पादे अस्येति।
ग का. यावैषाते . . .;
घ उ. . . . नः।। इतः परमूह्यम्। एवं द्वितीयेपि।

२ ययोरभ्यध्व उत यद्दूरे चिद्
यौ विदिताविषुभृतामसिष्ठौ⁺।
भवाशर्वौ भवतं मे स्योनौ
तौ नो मुञ्चतमंहसः।।२।।

५ ययोर्वधान्नापपद्यते किञ्च-
नान्तर्देवेषूत मानुषेषु।
भवाशर्वौ भवतं मे स्योनौ
तौ नो मुञ्चतमंहसः।।३।।

४ यावारेभाते वहु साकमुग्रौ
प्र चेदस्राष्ट्रमभिभां जनेषु।
भवाशर्वौ भवतं मे स्योनौ
तौ नो मुञ्चतमंहसः।।४।।

३ सहस्राक्षौ वृत्रहणा हुवे वां
दूरेहेती स्वनेमी उग्रौ।
भवाशर्वौ भवतं मे स्योनौ
तौ नो मुञ्चतमंहसः।।५।।

---

२ क का. योरभ्यध्व उभ यद्यौरे *; वा. . . . यदूरे . . .;
क उ. . . . चिज्यौ . , .।
ख का. * वितताविषभृतांममिष्ठौ।
उ. . . . . विषुवृताम(म. मि →)शिष्टौ।
३ क का. . . र्वधान्वाप . . .;
ज. . . र्वधांनाप(वा. → व). . .;
ख का. नान्तन्देवेषु उत *; उ. . . . षुत * ।।
उ. इतः परमूह्यम्।। एवं पञ्चमं यावत्।
४ क का. . . . रेभथे . . मुग्रो;
ख का. * चेतस्यराष्ट्र. . . उ, का. . . . भाञ्जनेषु।।
५ क का. सहस्राक्षो * * *;
उ. . . . हुदे *; म. . . . वा;
ख का. . . . सुनेमी *; $म_2$ . . . उग्रो।।
द्र. शौ. दूरेगव्यूती स्तुवन्नेम्युग्रौ। अत्र स्तुवन्नेमी उग्रौ इति शोधो ध्येयः। पैप्पलादपाठेऽपि स्वनन्नेमी इति। स्तुवन्। नेमि, स्तुवत्। नेमि इति पदपाठौ संशयितौ। प्रगृह्यद्विवचनान्तबहुव्रीहिपदमिदम्। स्तुवन् एमि उग्रौ इति ह्विट्नी। तत् प्रामादिकम्।

६ यः कृत्याकृद्यातुधानो महालो
नि तस्मिन् हतमधि वज्रमुग्रौ।
भवाशर्वौ भवतं मे स्योनौ
तौ नो मुञ्चतमंहसः।।६।।

७ अधि मे ब्रूतं पृतनासूग्रौ
सं वज्रेण सृजतं यत् किमीदि।
स्तौमि भवाशर्वौ नाथितो जोहवीमि
तौ नो मुञ्चतमंहसः।।७।।

## ४.३८

शौ.४.२६.१; मन्वे वां मित्रावरुणावृतावृधौ
तै.४.७.१५.५ सत्यौजसौ द्रुह्वाणं यौ नुदेथे।
मै. ३.१६.५; यौ सत्यावानमवथो हवेषु
का. २२.१५ तौ नो मुञ्चतमंहसः।।१।।

शौ.४.२६.२ सत्यौजसौ द्रुह्वाणं यौ नुदेथे
प्र सत्यावानमवथो हवेषु।

---

६ कख का. . . . महलो * * यहतमधिवज . . .।
ग वा. * भवन्तं मे *;
घ उ. तौ।।. इतः परमूह्यम्।
७ कख का. . . * पृतनास उग्रौ . . . यष् *;
क उ. * * वृतं . . .; वा. . . पृतनासू → शूग्रौ;
ख वा. . . . किमीदि(+नी);
ग का. . . . जहवीमि; वा, म. . . . योहवीमि;
४.३८.१ क का.सा.अ.।
ख का. सत्योजसौ दृह्याणी यो निरेते।
ग ज. . . . दृह्वाणं * *। म. . . . द्रुह्वणं * *।
ज. * * सत्यावान्म . . .;
घ वा. * * मुञ्चात . . .।। म, ज. तौ।।
२ क का. सत्योजसो दृह्वणी (वा. . . . दुर्ह्वाणं; ज. . . . दृह्वाणं)यो निदेथे (→ षे);
ख वा. * सत्यावान्मवथो *।

यौ +गच्छथो नृचक्षसा बभ्रुणा सुतं
तौ नो मुञ्चतमंहसः।।२।।

३ यावङ्गिरसोऽवथो+ यावगस्तिं
मित्रावरुणा जमदग्निमत्रिम्।
यौ कश्यपमवथो यौ वसिष्ठं
तौ नो मुञ्चतमंहसः।।३।।

५ यौ भरद्वाजमवथो वध्र्यश्वं
विश्वामित्रं वरुण मित्र कुत्सम्।
यौ कक्षीवन्तमवथः प्रोत कण्वं
तौ नो मुञ्चतमंहसः।।४।।

४ यौ श्यावाश्वमवथो यौ गविष्ठिरं
मित्रावरुणा पुरुमीढमत्रिम्।
यौ विमदमवथः सप्तवध्रिं
तौ नो मुञ्चतमंहसः।।५।।

---

ग वा.म. य उ . . . .; का. * गश्छतो . . क्षस आपभ्रूणा *;
उ. . . . वभृणा * ;
घ उ.तौ।। अत ऊह्यम्। एवं षष्ठं यावत्।

३ क-ग का. यवृङ्गिरसोमथो थावगस्ति . . . जमत्रिं। * . . . पमथो * *;
उ. . . . रसोवधो . . . यमदग्नि . . .। . . . (वा यौ → यो)
वशिष्ठं;

४ क का. * भार . . . वध्यध्वं;
द्र. पूर्वतनसंस्करणे * . . . . यौ * इति मुद्रणप्रमादः न तु कोश-
मूलकः।
ग का. सा. अ.।

५ क का. * द्यावास्य . . .; वा, म. * श्यावाश्यम . .;
उ. . . . गविष्टरं (म. ष्टिरं); वा. . . . यौ → यो *;
खग का. . . . पुमींढ . . .। यो * . . वष्टिं;

५ यौ मेधातिंथिमवथो यौ त्रिशोकं
मित्रावरुणा उशनं काव्यं यौ।
यौ मुद्गलमवथो गोतमं च
तौ नो मुञ्चतमंहसः। ।६। ।

७ ययो रथः सत्यवर्त्मर्जुरश्मि⁺-
तै.४.७.१५.६ मिथुया चरन्तमभियाति दूषयन्।
मै.३.१६.५ स्तौमि मित्रावरुणा नाथितो जोहवीमि
का.२२.१५ तौ नो मुञ्चतमंहसः। ।७। ।

## ४.३६

शौ.४.२४.१; इन्द्रस्य मन्वे शश्वधस्य मन्विरे
तै.४.७.१५.३ वृत्रघ्न स्तोमा उप मेममागुः।
मै.३.१६.५; यो दाशुषः सुकृतो हवमेता
का.२२.१५ स नो मुञ्चत्वंहसः। ।१। ।

शौ.४.२४.३ यश्चर्षणिप्रो वृषभः स्वर्विद्
यस्य ग्रावाणः प्रवदन्ति नृम्णे।
यस्याध्वरः सप्तहोता ⁺मदच्युत्
स नो मुञ्चत्वंहसः। ।२। ।

---

६ क का. यो . . . मवतो * *; वा. . . . यौ → यो *;
ख का. . . . काव्यू। वा. . काव्यंञ्जौ। ज. . . . काव्यञ्जौ।
ग उ. . . . गोतमञ्च; का. . . . गौतमं *;
७ कख का. * * सत्यवर्त्मरज्जु . . . चरन्ति . . .;
उ. * * . . वर्म (→ र्म-वा, र्म्म-म) दुरश्मिमिथुया . . .;
वा,म. * चरन्ति . . .।
ग वा,म. . . . योहवीमि;
४.३६.१ क उ. * * सश्वधस्यमन्युरे;
द्र. क न्यन्वयोर्भेदः प्रायशः अस्पष्टः। म- पुस्तिकयोः न्वी? न्यु?
खग का. * स्तौमा * मेमा अगुः . . . मेथा;
२ क का. . . . र्षणिप्रचर्षणि स्वर्विद्;
वा. यश्चरर्षणिः प्रो . . .; म. यश्चर्षणिः प्रो . . .;
वा. . . . वृषभ *;
ग का.यस्याध्वर्युस् * मुदिच्युत्; वा, म. . . मदच्चित्;
ज. . . . मदचित्;
५ घ का,म . . .। उ. सः। । इतः परमूह्यम्। एवं षष्ठं यावत्।

२　य उग्राणामुग्रबाहुर्यजु-
यो दानवानां बलमाससाद।
येन जिताः सिन्धवो येन गावः
स नो मुञ्चत्वंहसः।।३।।

४　यस्य वशास ऋषभास उक्षणो
यस्मै मीयन्ते स्वरवः स्वर्विदे।
यस्मै शुक्रः पवते ब्रह्मशुम्भितः+
स नो मुञ्चत्वंहसः।।४।।

५　यस्य जुष्टिं सोमिनः कामयन्ते
यं हवन्त इषुवन्तं गविष्टौ।
यस्मिन्नर्कः शिश्रिये यस्मिन्नोजः
स नो मुञ्चत्वंहसः।।५।।

६　य उत्तमः कर्मकृत्याय जज्ञे
यस्य वीर्यं प्रथमस्यानुबद्धम्।
येनोद्यतो+ वज्रोभ्यायताहिं
स नो मुञ्चत्वंहसः।।६।।

---

३ कख　का. योग्रणामुग्रबाहुर्यो *. . . .।
द्र.　र्यजुरिति नास्ति।

४ कख　का. सा. अ.।
ग　का. यस्मिञ् * प्रवर्तते ब्रह्मशुंभतस्;
वा. . . . सु → सम्भितः→ दः; म. . . . संभितः;
ज. . . . सम्भितः;

५ क-ग　का. * जुष्टियं * * यो . . . सश्रियेस्मि . . .;
क　वा, ज. * युष्टिं * *;
ग　वा. यस्मिंनर्कः . . .; ज. . . . यस्मिंनोजः;

६ क　उ. . . . यज्ञे; शौ. कोशेष्वप्येवम्। सा. जज्ञे।
ख　का. अस्ये . . . वुद्धं ; बुन्द्रं / बद्धं इति शौ. कोशाः।
ग　उ. येनोयतो . . .; का. यानाद्यतो . . .;
वा. . . . वज्रोभ्याजि → ज → तातार्हि; म. . . . भ्याय →
जतार्हि; का. . . . भ्यायताहं;

शौ.४.२४.७ यः संग्रामान्नयति संयुगे
तै.४.७.१५.४ वशी यः पुष्टानि संसृजति द्वयानि।
मै.३.१६.५
क.२२.१५ स्तौमीन्द्रं नाथितो जोहवीमि
स नो मुञ्चत्वंहसः।।७।।

४.४०

शुनं वत्सानपा करोमि शुनं बध्नामि तन्त्याम्।
आग्रयणं ब्रह्मणां हविस्तस्मिन्
जागार कश्यपः।।१।।

वाहुं वत्समुपनयन् पात्रे गां दुहन्नब्रवीत्।
अरिष्टं ब्रह्मभ्यो हविः शिवं कृणोतु कश्यपः।।२।।

त्रयस्तिष्ठन्ति सुकृतस्य लोके
त्रयोऽतीकाशास्त्रीणि शीर्षाण्येषाम्।
त्रयस्तिष्ठन्ति परिगृह्य कुम्भीं
यथा हविः कश्यप न व्यथातै।।३।।

---

७ कख का. . . . सं युधे. * * पुष्ट्यानस् . . जत *।
ख वा. . . . द्व → द्वयाति → नि। म, ज. . . . द्वयानि।
ग उ. . . . योहवीमि;

४.४०.१ का. * वात्मानपा * * * तंभ्यां आग्रेण ब्रह्मणा . . . स्मिञ्जागर कश्चन।
घ उ. - स्तस्मिं * *।।

२ क का. . . . मुपनयं; म, ज. . . . मुपनयन;
वा. . . . . मुपनयन् → न;
ख उ. . . . दुहनब्रवीत्।

३ का. यंत्रस्तिष्ठन्ति * * * तीकाशात्रीणि . . . प्रगृह्यकुम्भं * * कश्यपुं यथाते;
ख उ. त्रयोतिकाशा . . .।

सत्यात् सम्भूतो वदति तण्डुलान् क्षीर आवपन्।
ऋषिर्ब्रह्मभ्य आग्रयणं नि
वेदयतु कश्यपः।।४।।

ऋतुमुखे चन्द्रभागः पात्र ओदनमुद्धरात्।
प्राश्नन्तु ब्रह्माणो हविर्यथा वेदेन कश्यपः।।५।।
ये भूतान्यसृजन्त* ये भूतान्यकल्पयन्।
सर्वस्य विद्वानध्वर्युः षण्णां भवतु कश्यपः।।६।।

शिवा आपो वत्सेभ्यः शिवा भवन्त्वोषधीः।
वातो वत्सेभ्यः कश्यपः शिवः
शिवं तपतु सूर्यः।।७।।

**इति चतुर्थकाण्डेऽष्टमोऽनुवाकः**

**इत्यथर्ववेदे पैप्पलादसंहितायां सप्तर्चो नाम चतुर्थः काण्डः समाप्तः।**

---

४ खग का. तण्डुलात् क्षीरावपं . . . ब्रह्मत्याग्रेणं * चेदेतु कश्यप;
क उ. संभूतो . . .; ख ज. तण्डुलान * *।

५ का. . . . भागाष्पात्रमोद . . प्राप्नन्तु . . . कश्यप।
ख वा, म. . . . . मुद्धरात्।

६ क का. * . . . मृजन्ति; उ. . . . सृजन्ति;
द्र. असृजन्त इत्यस्माकं शोधः। तु ऋ ८.५६.६ग. "यानि स्थानान्यसृजन्त"। परन्तु असृजन्(त्)ये → असृजन्त्(इ)ये इति क्रमेणसंयोगान्तलोपाप्रसक्तिः स्वरभक्तिश्चानुमातुं शक्येताम्।
घ उ. पर्ण्णा * *।। का. . . भवति कश्यप।

७ का. * पो * * . . . * * * शिवशिवं * * ZZ
काण्डिकान्ते का. इति अथर्वणपैप्पलादशाखायां चतुर्थष् काण्डस् समाप्ताः ZZ काण्डः Z४Z
वा. ।। ४० ।। ऋ७ ।। अ ।। सप्तर्चकाण्डः समाप्तः ।।
श्री ।। ।।*।। ।।*।। श्री।। * श्री।।
म. ।।४०।।ऋ७।। अ८।। सप्तर्चकाण्डः समाप्तः।।
ज. ।।ऋ७।।४०।। सप्तर्चकाण्डः समाप्तः ।। ।।श्री।।

# पञ्चमः काण्डः

५.१

तु.पै.१०.१.१ नमः पिशङ्गबाह्वै सिन्धौ जाताया उग्रायै।
यो अस्यै नम इत् करदपेदस्य गृहादय।।१।।

अपेहि नो गृहेभ्यो ऽपेहि वत्सतन्त्याः।
आत्मानमत्र रोत्स्यस्यव रोह महानसात्।।२।।

हा अम्ब सुहूतले अथो है षामनन्तमे।
पुत्रो यस्ते पृश्निबाहुस्तमु त्वं सामनं कृधि।
अथो दुहितरं नघ्रीमथो त्वं सामना भव।।३।।

शौ.२.१४.४ भूतपतिर्निरजत्विन्द्रश्चेतः सदान्वाः।
गृहस्य बुध्न आसीनास्ता वज्रेणाधि तिष्ठतु।।४।।

अपेतेतः सदान्वा अहिंसन्तीरिमं गृहम्।
धेनुर्वा अत्र य स्थास्यत्यनड्वान् वेरया सह।।५।।

---

काण्डारम्भे का. अथ पञ्चमाष्काण्डा लिख्यते zz zz
ओं नमो गणेशाय z ओं नमो ज्वालाभगवत्यैः zz zz ओं . . .
उ. ओं . . . .।

७१ का. नमष् * सिन्धु * * * स्ये नमेतकनदपेदस्य गृहादयत्।
गघ वा. योऽस्यै * * . . . .।।

२ ख-घ का. पेहि वत्सतंभ्या . . . रोचित्सवरोह महानश।
ख वा. अपेहि * । ज. अपेहि वत्सत(→द)न्त्याः।

३ का. हाम्बसूतले थोवै सामशंत्तम।
ख उ. * * षामनन्तवे।
ग-च का. . . . . पृष्णिबाहुस्तमत्वं सासनं * । * * नघ्रीपथो * * भभव।

४ का. . . . . र्निरजात्विन्द्रः चेतिस्सदान्वा। * बुध्नासीना ता . . .।

५ का. अपेतेतिस् * हिंसन्तीरिमं * । . . . वांत्रस्थाम्यसत्यनड्वान्
वेदया * ।

शौ.३.६.४कख या सहमाना चरसि सासहान इव ऋषभः।
पै.६.८.३कख सदान्वाघ्रीं त्वा वयं जैत्रायाच्छा+ वदामसि।।६।।

शौ.१६.३२.६कख सहस्व नो अभिमातिं सहस्व पृतनायतः।
सहस्व सर्वा रक्षांसि सहमानास्योषधे।।७।।

त्वं व्याघ्रान् सहसे त्वं +सिंहाँ उभयादतः।
मक्षाश्चित् कृण्वाना मधु त्वं सहस ओषधे।।८।।

## ५.२

इयं पित्रे +राष्ट्र्येत्यग्रे
शौ.४.१.२ प्रथमाय जनुषे भूमिनष्ठौ।
ब्राह्मण-श्रौत-सूत्रेष्वपि तस्मा एतं सुरुचं ह्वारमह्यं
घर्मं +श्रीणन्तु प्रथमस्य +धास्योः।।१।।

---

६ कख का. यस्सहमानश्चरसि सासहानैवं ऋषभ।
म. * * * * इवर्षभः।
गघ का. सदान्वाघ्रं * * जैत्रायात्सा * ।
७ कख का. सहस्वि * भिमातिहं * *;
क वा. * * भिमातिं;
म. * * ऽभिमातिं;
घ का. सहसानाम्योषधे;
८ कख का. * व्याघ्रां सहमे * स्यह्वाँ उभयादुत।
उ. * * * सिंहां * ।
गघ का. मक्षश्चित * * * सहसौषधे z9z
१ कख का. यं * राट्र्यत्यग्रे * * भूमिनष्ठौ
उ. * * राट्रेत्यग्रे . . . । म. . . . भूमिनिष्टौ।
गघ का. * * सुरुच * * शृण्वन्तु प्रथमससु धास्युः।
उ. . . . . . श्रीणन्ति * धास्यौ।।

शौ.४.१.१,५.६.१, ब्रह्म जज्ञानं प्रथमं पुरस्ताद्
पै.६.११.१; वि षीमतः सुरुचो वेन आवः।
अन्यत्रापि। स बुध्न्या उपमा अस्य विष्ठाः
सतश्च योनिमसतश्च वि वः।।२।।

शौ.४.१.३ प्र यो जज्ञे ⁺विद्वाँ अस्य बन्धुं
तै.२.३.१४.६ विश्वानि देवो जनिमा विवक्ति।
ब्रह्म ब्रह्मण उज्जभार मध्यान्
नीचादुच्चा⁺ स्वधा अभि प्र तस्थौ।।३।।

तै.२.३.१४.६ महान् मही अस्कभायद्वि जातो
शौ.४.१.४गघ द्यां द्वितः पार्थिवं च रजः।
शौ.४.१.५कख स बुध्न्यादाष्ट्र जनुषाभ्यग्रं।
बृहस्पतिर्देवता तस्य सम्राट्।।४।।

शौ.४.१.६ नूनं तदस्य गव्यं हिनोत
महो देवस्य पूर्व्यस्य महि।
एष जज्ञे बहुभिः साकमित्था
पूर्वादर्द्दादविथुरश्च सन्नु।।५।।

---

२ कख का. ब्रह्मा * * * वि सीमतस् * * *
उ. * यज्ञानं . . . आवह।
गघ का. * वुद्ध्या उपमांस विष्ठा * योनिमसूसतश्च * *।
वा. . . . मशतश्च . . .।

३ कख का. प्रा * * विद्वा * * विश्वां देवा . . .।
उ. * * यज्ञे विद्वाङ् . . . . . .
गघ का. 'ब्रह्म' नास्ति। नीचादुश्चास्वधयाभि * *।
उ. . . . दूचात् स्वधा अधि * *।।

४ ख का. * जितः . . . .।
ग का. * वुध्न्याराष्ट्र जनुषाभ्यक्रं; उपरि संन्धा इति।

५ कख का. * तस्य गव्यो हनोति * * पूर्वस्य पहि।
वा. . . . . पूर्वस्य *।
वा,म. * यज्ञो * साकमित्थात्;
ज. * यज्ञो * *;
घ का. पूर्वादरादविदुरश्चसह्नुः।

शौ.४.१.४कख स हि दिवः स पृथिव्या ऋतेष्ठा महि क्षामन् रजसी वि ष्कभायति।
५गघ अहर्यच्छुक्रं+ ज्योतिषो जनिष्टाधा द्युमन्तो वि वसन्त्वरिप्राः+।।६।।

७ एवाथर्वा पितरं विश्वदेवं बृहस्पतिर्नमसा वोचदच्छ।
त्वं विश्वस्य जनिता धास्यग्रे कविर्देवान्न दभाय स्वधावः।।७।।

x मूर्ध्ना यो अग्रमभ्यर्त्योजसा बृहस्पतिर्मा विवासन्तु देवाः।
भिनद्वलं वि मृधो दर्दरीति कनिक्रदद् गाः स्वरपो जिगाय।।८।।

## ५.३

१-३ उदपप्तदसौ सूर्यः पुरुदृष्टो अदृष्टहा।
ऋ.१.१९१.८,७द्रः उदायन् +रश्मिभिर्हन्तूदायन्नरसाँ अकः।।१।।

---

६ का. * * * सहि * ऋचेष्ठा मयि-क्षामं भ्रजसी * * । आर्यश्छुक्रं * धनिष्टाधा ध्यमन्तो * वसंत्वरिप्रा।
ख ज. - मनूरजसी- इति नष्टम्।
गघ उ. अहर्यछुक्रं * (ज.ध →)जनिष्ठाधा द्विमन्तो * वसन्त(ज.संत)रिप्राः।।

७ कख का. यथावाथर्वा * * वृहस्पतिर्मनसा वोदत्स्व।
उ. . . . . वोचदछ।
गघ का. * * जनुष्या धतस्याग्रे . . देवां अधभायुस् स्वधाव।

८ क उ. मूर्द्धा . . .;
ख का. विवासन्ति *;
गघ का. भिन्नद्बलं वि मृदोर्दरीति कनिक्रदति गा * जिघाय ZZ २Z
उ. . . . . स्वरवो * ।।

५.३.१ का. . . . सूर्यष्पुरदृष्टो * । उदायं रश्मिभ्रुवंतूदायं रसां * ;
ज. उदायंन्नश्मिभिर्हन्तुदायंनरसाङ् * ।।
वा, म. . . . . र्हन्तुदायन्नरसाङ् * ।।

*न्यम्रुचदसौ सूर्यो विश्वदृष्टो अदृष्टहा।
निम्रोचन् रश्मिभिर्हन्तु निम्रोचन्नरसाँ अकः।।२।।

ये च दृष्टा ये चादृष्टा उभयेहविष्यवः।
तेषां वो अग्रभं नाम सर्वे साकं नि जस्यत*।।३।

अदृष्टहननी वीरुदमितौजा विषासहि।
चुकाकणि त्वं जज्ञिषे सादृष्टां जातशो जहि।।४।।

जहि ज्येष्ठमदृष्टानां सर्पाणां मोघचारिणाम्।
क्रिमीणां सर्वा जातानि पौञ्जष्ट इव *यवं मृण।।५।।

यश्च तोदो यश्च सर्प एकादृष्टश्च यो वृषा।
चुकाकणि त्वं तान् वृश्च वृक्षं परशुमानिव।।६।।

सं वृश्चैनांश्चुकाकणि वृंक्षं परशुमानिव।
क्रिमीणां सर्वा जातानि सं दहाग्निरिवोलपम्।।७।।

---

२ का. निम्रततसौ * * *। निम्रोचं रश्मिभवन्तु निम्रोचं रसां * ।
उ. न्यमृचदसौ . . . . न्नरसाङ् * ।।

३ ख का. उभये विह्यवः;
ग वा, ज. तेषाम् * * *; घ का,उ. . . . जस्यच।।

४ कख का. * वीरुदसितौजा * । वा. * वीरुदमितौया * ।
ज. . . . . . विषासही।
गघ का. च्युकाकणि * * . . . जातसो हि।
वा. * * यज्ञिषे . . .।।
ज. * * यज्ञिषे . . . जातसो * ।।

५ गघ का. * सर्व * पौञ्जष्टी यवयं सृणा।
उ. . . . जवं * ।।

६ का. . . सर्पो यश्चादृष्टश्च * *। च्युकाकणि * * वृश्चि * . .।
गघ उ. . . . . पर्शुमानिव।।

७ का. * वृश्चीनांश्चुकाकर्णिवृक्षं . . .। सं वृश्चीनांश्चुकाकणिर्वक्षं परशुमानिव। * सर्व * सन् . . . वोलपं;
कख ज. * वृश्च्यैनांश्चुकाकणि * *। वा, म. . . . पर्शुमानिव।
घ वा,म. सन् दहाग्निरिवोलपन्।। ज. * दहाग्निरिवोलपन्।।

मेथिष्ठाग्निरघलस्त्विषीमान् क्रिमीणां जातानि प्र दुनोत सर्वा।
बृहस्पतेर्मेदिने जातवेदा अदृष्टान् हन्तु दृषदेव
माषान्।।८।।

५.४

शौ.५.३.१ ममाग्ने वर्चो विहवेष्वस्तु
ऋ.१०.१२८.१ वयं त्वेन्धानास् तन्वं पुषेम।
तै.४.७.१४.१ मह्यं नमन्तां प्रदिशश्चतस्रस्
त्वयाध्यक्षेण पृतना जयेम।।१।।

शौ.२ अग्ने मन्युं प्रतिनुदन् परेषां
ऋ.६ त्वं नो गोपाः परि पाहि विश्वतः।
तै.६ अपाञ्चो यन्तु प्रबुधा दुरस्यवो
ऽमैषां चित्तं बहुधा वि नश्यतु।।२।।

शौ.३ मम देवा विहवे सन्तु सर्व
ऋ.२ इन्द्रवन्तो मरुतो विष्णुरग्निः।
तै.२ ममान्तरिक्षनुरुलोकमस्तु
मह्यं वातः पवतां कामे अस्मिन्।।३।।

---

८ का. मेतिष्ठागिरखलस्त्विषीमां कृमीणां * पृतनोतु * । वृहस्पतिर्मेदिनी
* * * * साखां z ३z

५.४.१ क का. समाग्ने * *
वा, म. . . . विहवेस्वस्तु; ज. . . . विहवेस्वस्ति।
ख उ. वयन्तेन्धानास् * *।
घ म. त्वयाऽध्यक्षेण * *।।

२ क का. * * प्रतिनुदं *;
ख ज, वा. त्वन्नो * * पातु *।
गघ का. अपांचो यंतु प्रवुधा दुरस्यवो ममीषा . . . ।
उ. * * * * मैषां . . .।

३ ख का. इन्द्रवत्तो . . . .;

ऋ.४ मह्यं यजन्तां मम यानीष्टा-
शौ.४ कूतिः सत्या मनसो मे अस्तु।
तै.४ एनो मा नि गां कतमच्चनाहं
विश्वे देवा अभि रक्षन्तु मामिह।।४।।

शौ.५
तै.३ मह्यं देवा द्रविणमा यजन्तां
ऋ.३ ममाशीरस्तु मम देवहूतिः।
दैवा होतारः सनिषं न एत-
दरिष्टाः स्याम तन्वा सुवीराः।।५।।

शौ.६कख,७गघ
ऋ.५ देवीः षडुर्वीररुणस् कराथ
तै.५ विश्वे देवास इह मादयध्वम्।
मा हास्महि⁺ प्रजया मा धनेन
मा रधाम द्विषते सोम राजन्।।६।।

ऋ.८
शौ.८ उरुव्यचा नो महिषः शर्म ⁺यच्छा-
तै. ८ दस्मिन् वाजे पुरुहूतः पुरुक्षुः।
स नः प्रजायै हर्यश्व⁺ मृडेन्द्र
मा नो रीरिषो मा परा दाः।।७।।

---

४ कख का. * * सम यानीग्राकुतिस् * * * *।
ज,वा. * * * जानीष्टाकूतिः * * * *।
ग का. योनो * * * कतमश्चनहं;

५ क का. * * * यजन्ता समाशीरस्तु * *;
गघ का. * * सनिशं न एतररिष्टा * तन्वास् * ;
वा. . . . . एतदरिष्टा स्यामि * * ।।
ज, म. . . . . स्यामि * *।।

६ कख का. * षडुर्वीरणुरस् करा। थविविश्वे देवासुस * *;
७ वा. देवी . . . .।
गघ का. मा हस्महि . . . दधाम द्रिषते * *;
उ. म हास्मेहि . . .।।

७ कख का. * * महिषश् * यशछदस्मिन् वाते पुरुहुतष् पुरुक्षस्;
वा. . . . . यछादस्मिन् * पूरुहूतः * ।
ज, म. . . . यछादस्मिन् * * *।
ग का. सनः। * हर्यस्व * मृडयेन्दु;
उ. * * * हर्यश्च * ;

शौ.६ धाता विधर्ता भुवनस्य यस्पतिः
ऋ.७ सविता देवो अभिमातिषाहः।
तै.७ बृहस्पतिरिन्द्राग्नी अश्विनोभा
देवाः पान्तु यजमानं निर्ऋथात्।।८।।

क-ग तै.ब्रा.२.४.३.२ इहार्वाञ्चमति ह्वय इन्द्रं जैत्राय जेतवे।
अस्माकमस्तु केवल इतः कृणोतु वीर्यम्।।६।।

शौ.११ अर्वाञ्चमिन्द्रममुतो' हवामहे यो गोजिद्धनजिदश्वजिद्यः।
तै.१० इमं नो यज्ञं विहवे जुषस्वास्माकं कृण्मो हरिवो
मेदिनं त्वा।।१०।।

शौ.७.८६.१ त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम्।
हुवेम शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवान्
पात्विन्द्रः।।११।।

शौ.५.३.७कख तिस्रो देवीर्महि मे शर्म यच्छन्' प्रजायै मे तन्वे यच्च पुष्टम्।
मां विशः संमनसो जुषन्तां पित्र्यं क्षेत्रं प्रति
जानात्वस्मान्।।१२।।

---

८ ख-घ का. * * भिमातिषाहः . . . निर्ऋथा।

६ क का. याहवांचमतिह्वयार; गघ का. . . . वर्ण यतष् * *।

१० क का. . . . मवतं *; उ. . . . ममृतो * ; ख उ. * * धनजिदश्चजिद्धः।

ग म,वा. इमन् * * * *; घ का. . . . कृण्वो * * *।

११ क का. . . . मवतारमिन्द्रं; घ का.. स्वस्ते * मघवानु . . .

१२ क का. तिस्रोर्देवी . . . यन्; उ. . . . यछत्;

ख-घ का. * * तन्व यश्च * । * विषस् . . . क्षत्रं पृत जानात्वस्मात्;

यो नः शक्राभिमन्युनेन्द्रामित्रो जिघांसति।
त्वं तं वृत्रहञ् जहि +वस्वस्मभ्यमा भर।।१३।।

शौ.१० ये नः शपन्त्यप ते भवन्त्विन्द्राग्निभ्यामप बाधामहे तान्।
ऋ.६,तै.६ आदित्या रुद्रा उपरिस्पृशो मामुग्रं चेत्तारमधि-
राजमक्रन्।।१४।।

५.५

पृथिवी वशा साग्निं गर्भं दधे
सेमं पाहि तस्यै ते विधेयं
तस्यै ते नमस्तस्मै ते स्वाहा।।१।।
अन्तरिक्षं वशा सा वायुं गर्भं [दधे
सेमं- - - - - - - -]।।२।।
द्यौर्वशा सा सूर्यं गर्भं [दधे सेमं- - - - -]।।३।।
ऋग्वशा सा साम गर्भं [दधे सेमं - - - - -]।।४।।
दक्षिणा वशा सा यज्ञं गर्भं [दधे सेमं - - ]।।५।।
विड् वशा सा क्षत्रियं गर्भं [दधे सेमं - - ]।।६।।
वाग् वशा सा परमेष्ठिनं गर्भं [दधे सेमं- - ]।।७।।
वशा वशा सा राजन्यं गर्भं [दधे सेमं - - ]।।८।।

---

१३ का. • नश्चक्राभिमन्युनेन्द्रमित्त्रोहि • । तंत्वं • • वसूसस्मभ्यमाभर।
ग उ. • • वृत्रहं • ;
घ वा. मस्मस्मभ्यमाभर।।
म. म (→द) स्मस्वभ्यमाभर।।
ज. वस्मस्वभ्यमाभर।।
१४ कख का. • • शपन्त्युप • . . . . भ्यामप बाधाम योनिम्;
म. . . . . भ्यामप (→व) वाधामहे •।
५.५.१ का. • • सा अग्निं • चदधे सोमं • • • • • • नमस्तस्यै • •।
३ का. द्यौर्वशाशा • • •;
५ का. • • • यज्ञियं • ; द्रः षष्ठो मन्त्रोऽयम्।
द्रः ६ का. पञ्चमो. मन्त्रोऽयम्

समा वशा सा संवत्सरं गर्भं दधे
सेमं पाहि तस्यै ते विधेयं
तस्यै ते नमस्तस्मै ते स्वाहा।।६।।

**इति पञ्चमकाण्डे प्रथमोऽनुवाकः**

५.६

तै.आ.१.७.४ सप्त सूर्या दिवमनुप्रविष्टास्तान् पथा वान्वेतु+
दक्षिणावान्।
तेऽस्मै सर्वे घृतमा तपन्त्यूर्जं दुहाना
अनपस्फुरन्तः।।१।।

आतपन्+ क्षयति नीच्यादा सव्या अधि निष्टपन्।
अधा यत् पत्रः सूर्य उदेति बृहतीरनु।।२।।

आतप्ता पितॄन् विद्म दस्यू निष्टप्ता वयम्।
गुहा येऽन्ये सूर्याः स्वधामनु चरन्ति ते।।३।।

द्यौः सचतेऽपराज् जनासः पञ्चान्ये परो दिव आ क्षियन्ति।
तां ब्रह्म वेदं बृहदा विवेश यस्तान् प्रवेद
प्रथरमतर्यतः।।४।।

---

६ क उ. * * * सम्वत्सरं * *;
ख-ग का. सोमं . . . नमस्तस्यै * * Z५Z

५.६.१ कख का. * * . . . स्तां पथेवान्वयतु दक्षिणावां;
वा,म. . . . वान्वेति * ।
गघ का. तस्मै * घृतमातपन्तूर्ज * नपस्फुरन्ता;

२ का. आतपं क्षीदनीयाचसव्याधिनिष्टपं अधायत्तपत्र * उदयद्. . .।
उ. आतपन . . . .।।

३ का. आत्पिता * * दस्यू (←म्यू) नि निष्टस्ता * * यन्ये सूर्या . .
. चरन्तु * ।

४ का. * सतेर्वेवराञ् * पञ्चत्ये पुरो दिवा * ।
क उ. द्यौ * * *;
ख वा,ज. . . . . क्षयन्ति।
का. * * देवं वृहदा * तान् * प्रचरमधिर्यता।

यो ददाति यो ददते यो वा निधीञ्+ श्रद्दधानो निधत्ते।
यमो वैवस्वतान् राजा सर्वान् रक्षत शेवधीन्।।५।।

मा विदन् पर्यायिणो येदक्षिणाः परिमुष्णन्ति दत्तम्।
सुगेन तान् पथा सर्वान् यमो राजाति नेषत।।६।।

येन पथा वैवस्वतो यमो राजेतो ययुः।
अग्निर्नस्तेन नयतु प्रजानन् वैश्वानरः पथिकृत्
विश्वगृष्टिः।।७।।

+महि ज्योतिर्निहितं मर्त्येषु येन देवासो
अतरन्नराती।
तेनेमं सेतुमति गेष्म सर्वे वैश्वानरं ज्योति-
रसीव देवाः।।८।।

---

५ कख का. * * * यजते यं धीनश् * धत्ते।
ख उ. * * निधीत् * *।
गघ का. * वैवस्वतानु . . . उक्षतु सवधीः।

६ का. साविधं पर्यायणो यो . . . धत्तं। सुगणतां * * * . . . नयषत्।
ग. उ. * * * सर्वा।

७ ख का. * राजा ययूं। वा. * रायेतो * ।
गघ ज. अग्निर्ण . . . ; का. . . . नेतु * वैश्वनरष् . . .।

८ कख का. नहि ज्योतिन्निहत मर्त्येष्वेन . . .।
$म_1$. महज्योति . . .।
$म_2$. महर्ज्योति . .।
वा. महिर्ज्योति . . . जेन . . . ।
ज. महिर्ज्योति . . .।
ग उ. तेनैमं . . . ; म. गेस्म;
घ का. * ज्योतिरमीह * ।
म, ज. * ह्योतिरसीव * ।।

शौ.७.५३.७ उद् वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्।।६।।

तै.आ.१.७.१ आरोको भ्राजः पटरः पतङ्गः
स्वर्णरो ज्योतिषीमान् विभासः।
पै.५.६.१गघ तेऽस्मै सर्वे घृतमातप-
न्त्यूर्जं दुहाना अनपस्फुरन्तः।।१०।।

५.७

शौ.४.१५.१ समुत् पतन्तु प्रदिशो नभस्वतीः
समभ्राणि वातजूतानि यन्तु।
महर्षभस्य नदतो नभस्वतो
वाश्रा आपः पृथिवीं तर्पयन्तु।।१।।

३कख समीक्षयति विश्वग्वातो +नभां-
स्यपां वेगासः पृथगुत् पतन्तु।
२ गघ वर्षस्य सर्गामभि यन्तु भूमिं
पृथग् जायन्तामोषधयो विश्वरूपाः।।२।।

---

६ कख म. * * . . . स्परिर्ज्योतिष्प . . . .;
वा,ज. * * . . . स्परिर्ज्योतिः * *;
घ म,ज. ह्योतिरुत्तमं।।

१० क का. * भ्राजष्पबारष् * ;
ख का. * ज्योतिषीमां विभास;
म. * * विभास।
गघ का. तस्मै * घृतमातपतोर्जं * नपस्फुरन्तः z१z
म. * * * घृतमातपन्तूर्जं * * ।।

५.७.१ का. . . . . नभस्वती सपत्राणि * यन्ति। मार्षभस्य नुदतो *
वाम्राफ पृतिवीन्तर्ष . .।

२ कख का. समिक्षद् . . . नपांस्यपां . . .। उ. . . . नभास्यपां . .।
गघ का. * स्वर्गामायन्तु . . . विश्वारूपाः।

६ अभि क्रन्द स्तनयार्दयोदधिं
भूमिं पर्जन्य पयसा समङ्धि।
त्वया वर्षं बहुलमेतु सृष्ट-
माशारैषी कृशगुरेत्वस्तम्।।३।।

५कख उदीरयत मरुतः समुद्रत-
स्त्वेषार्का नभ उत् पातयन्तु।
२कख प्र वर्षन्ति तमिषाः सुदानवो
ऽपां रसैरोषधयः सचन्ताम्।।४।।

४ गणास्त्वोप गायन्तु मारुताः पर्जन्य घोषिणः पृथक्।
सर्गा वर्षस्य वर्षतः सृजन्तु पृथिवीमभि।।५।।

७ समवन्तु सुदानव उत्सा अजगरा उत।
वाता वर्षस्य वर्षतः प्र वान्तु पृथिवीमनु।।६।।

६कख वातो विद्युदभ्रं वर्षं समवन्तु सुदानवः।
प्र प्यायस्व प्र पिन्वस्व सं भूमिं पयसा
सृज।।७।।

---

३ का. * * स्तनयान्दयोदधिं * * * समगृधि
तया * . . . मेत . . सामारेषी क्रमगुलेयतस्थं।
घ वा. - माशारैषी (→शी) . . .; उ. . . . कृशशुरेत्व . . .।।

४ ख का. . . . . न। भूत * ।
ग का. प्रवर्षयन्ति तमिषा * ; म,ज * वर्षन्त . . .।
घ का. * रसीरोषधी * ।

५ कख का. . . . स्तोप * * * * * । म, ज. . . . घोषिण * ।
गघ का. स्वर्गा * वर्षतुस् * . . . मनु।

६ कख का. * सदानवोत्साजगरा * । ख उ. उछा * * ।
गघ का. * * वर्षतुष्मवहन्तु . . .।

७ का. . . . . समवं सुधानवः प्रा * * पितृस्व मं * * * ।

१० अपामग्निस्तनूभिः संविदानो य ओषधीनामधिपा बभूव।
स नो वर्षं वनुतां जातवेदाः प्राणं प्रजाभ्यो
अमृतं दिवस्परि।।८।।

८ आशामाशां वि द्योततां वाता वान्तु दिशो दिशः।
मरुद्भिः प्रच्युता मेघा वर्षन्तु पृथिवीमभि।।९।।

११ प्रजापतिः सलिलादा समुद्रादाप ⁺ईरयन्नुदधिमर्दयाति।
प्र प्यायतां विष्णो अश्वस्य रेतो ऽर्वाङ् एतेन स्तनयित्नुनेह्य-
पो निषिञ्चन्नसुरः पिता नः।।१०।।

१२ श्वसन्तु गर्गरा अपामव नीचीरपः सृज।
वदन्तु पृश्निबाहवो ⁺मण्डूका इरिणानु।।११।।

---

८ क उ. . . . . स्तनुभिः * ; ख का. * ओधीनामधिपो * ।
गघ का. * * * वैनुतां * प्राणंप्राणं * * * । औं प्राणं प्रजाभ्यो अमृतं
दिवस्परि।
घ उ. * * ऽमृतं दिवस्परि।। *।। द्र. अतो मङ्गलचिह्नान्यङ्कितानि।

९ क का. आमामासां * * ; वा, म१, ज. . . . . वि द्योतता;
म२. . . . : . वि द्योत (तां →) ता;
घ का. * . . . मनु।

१० क म,ज. * शलिलादा . . .;
ख का. . . . दापीरयंनिदधि . . . .। उ. . . . ईरयनुदधि . . .।
गघ का. प्रा * * श्वस्य नेतो। अर्वाङ्तेिन . . .;
वा,म. . . . स्तनइलु . . .;
ङ का. . . . निषिञ्चनसुरष् * * ;
वा. . . . निषञ्चनसुरः * * ।।
म. . . . निषिञ्चंनसुरः * * ।।
ज. . . . निषिञ्चनसुरः * * ।।

११ का. * * पामव नीचीरप * वन्तु पृष्णि . . . माण्डूका ऋणानु।
घ उ. मण्डुका . . .।।

